Contains the second Sarga and the first Adhyāya complete. The second Adhyāya is incomplete. There is apparently some confusion in the arrangement of the chapters.

**Beginning:**

अथाद्रिराजस्सह विष्णुवेधसा संभोजयामास शिवं शिवामपि ।
विचित्रनानाविध अन्नराश्यै(?)रनेकशाकैरपि भक्ष्यभोज्यैः ॥
सशर्करान्नैरपि पायसान्नैर्नानाविधैः पक्वफलादिकैश्च ।
क्षीराज्यखण्डैर्मधुनाक्तभोज्यैः पानीयशीतोदकपानकैश्च ॥

* * * *

कृत्वा तु सर्वेऽपि मुदादिदेवं निवेश्य चान्तर्गृहमादिदेवीम् ।
एवं च कृत्वा परमेश्वरस्य देव्याश्च कल्याणमहोत्सवं मुदा ॥
अथापरेद्युर्दिवसे च शुक्रे वारे वृहन्नायकधर्मकर्त्रा(र्ता) ।
देव्यालये हेमध्वजस्समीपे कृत्वासितर्द्दढशिलैस्सहसा विमानम् ॥

* * * *

इदं विवाहं रघुनायकस्य देव्याश्च चाख्यानमथोपशृण्वतः ।
पुत्रैश्च पौत्रैश्च कलत्रमित्रैर्विचित्रभोगैस्सकलैस्स एधते ॥

**Colophon :**

इति श्रीरघुनाथकविविरचिते रामेश्वरविवाहोपाख्याने द्वितीयस्सर्गः ॥
मन्दं चलन्नुचितभूषणभूषिताङ्गः समाययौ चात्मविवाहमण्टपम् ।
सचित्ररत्नाचितसैंह आसने सहाम्बया तत्र निविष्ट आद्यः ॥

* * * *

स विष्णुश्रीभ्यां सहपत्निकोऽद्रिः सभृङ्गराजोदकधारपूर्वकैः ।
सङ्गृह्य पाणिं सहजाम्बिकायाः ददौ शिवस्याद्भुतहस्तयोर्मुदा ॥

* * * *

शिवं तया वासनमाससाद निवेद्य नीराजनधूपदीपैः ।
एवं समाराधितदेववृन्दैः विप्रादिवर्णैरपि सेव्यमानः ॥
सहाम्बया पर्वतवर्धपिन्या धाम प्रदक्षिणवशात्प्रविवेश गेहम् ।

**Colophon :**

इति श्रीरघुनाथकविविरचिते रामेश्वरविवाहोपाख्याने प्रथमोऽध्याय-स्समाप्तः ।
सोऽयं प्रविश्य भवनं जगदीश्वरोऽथ माङ्गल्यपूर्वविहितानि चकार देवः ।
विप्रैः स्वकैर्मङ्गलवाद्यघोषैः कृत्वाङ्कुरार्पणसुरक्षणकाशियात्राम् ॥

* * * *

देवादिधर्मपरिपालनदीक्षितेन श्रीरामनाथयतिना वृहन्नायकेन ।
संसेवितश्च निजसेतुभुवाधिपेन श्रीमुद्दुरामलिङ्गभुविपालकुशेखरेण ॥

संसेवितश्च रघुनाथकृतोपचारैः श्रीरामनाथोऽथ प्रसन्नचित्तः ।
तं वीक्ष्य देवी निजभावपूर्णं ननाम सा नान्यमना मनस्विनी ॥

**End:**

श्रीगन्धमादनगिरिस्सह बन्धुवर्गैरालोच्य सेतुपतिना सहजाविवाहम् ।
कर्तुं प्रभोस्तु रघुनायकनायकस्य श्रीरामनाथयतिना सह ब्राह्मणैश्च ॥

गत्वा तां हिमशैलराजतनयामापृच्छय गन्धाचलः
श्रीरामेण कृतं तटाकममलं श्रीरामतीर्थाभिधम् ।
तस्याश्चोत्तरभागदेशविमले चोद्यानवाटीवृते
तस्मिन्नाश्रममाकरोच्च सहसा दिव्यैर्लताभिर्गृहम् ॥

शृङ्गाग्रस्वर्णविलसत्करिपोतमग्र्यं ग्रामप्रदक्षिणमहोऽत्र च कारयित्वा ।
वैप्रं गृह्यविभूतिभूषितमहारुद्राक्षमालान्वितः.

---

## R. No. 1399.

Paper. 11¼ × 8¾ inches. Foll. 93. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1914-15 from the Library MS. described under R. No. 223(*a*) *ante*.

**तत्त्वचिन्तामणिदीधितिव्याख्या.**

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ.

Same work as that described under R. No. 223(*a*) *ante*.
Contains the Pratyakṣa incomplete.

---

## R. No. 1400.

Paper. 11 × 8¾ inches. Foll. 117. Lines, 20 in a page. Telugu. Good.

Restored in 1914-15 from the Library MS. which has been already described under R. No. 412 *ante*.

लघुस्मार्तपद्धतिविवेचनिका.

LAGHUSMĀRTAPADDHATIVIVĒCANIKĀ.

Breaks off in the Arghyavismṛtinirṇaya.

---

R. No. 1401.

Paper. 11¼ × 8⅜ inches. Foll. 266. Lines, 19 in a page. Telugu. Good.

Restored in 1914-15 from the Library MS. which has been already described under R. No. 1170 *ante*.

नामलिङ्गानुशासनव्याख्या.

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ.

By Bommakaṇṭi Appayasūri.

Wants the first six pages.

---

R. No. 1402.

Śrītāla. 11¾ × 2¼ inches. Foll. 265. Lines, 9 in a page. Grantha. Fair.

Purchased in 1914-15 from M.R.Ry. Jānakirāma Lāla of Triplicane.

(*a*) अनर्घराघवम्.

ANARGHARĀGHAVAM.

Foll. 1*a*—82*b*.

By Murāri. Same work as that described under R. No. 132(*b*) *ante*.

Complete.

---

(*b*) अनर्घराघवव्याख्या—विक्रमीया.

ANARGHARĀGHAVAVYĀKHYĀ; VIKRAMĪYĀ.

Foll. 83*a*—265*b*.

By Mānavikrama. Same work as that described under R. No. 132(*a*) *ante*.

Breaks off in the forty-seventh stanza of the sixth Aṅka.

## R. No. 1403.

Palm-leaf. 17¾ × 1⅜ inches. Foll. 156. Lines, 8 in a page. Telugu. Injured.

Purchased in 1914-15 from M.R.Ry. S. Gōpālācāriyar of Villiyambākkam.

The first 2 leaves are broken in the beginning.

### वेदान्तसिद्धान्तसारः.

### VĒDĀNTASIDDHĀNTASĀRAḤ.

A treatise containing the leading principles of the Advaita school of the Vēdānta and apparently based upon the Bhāmatī of Vācaspatimiśra and the Tattvadīpana of Akhaṇḍānandamuni: by Umāmahēśvara of Vellāla family.

Contains the first Paricchēda entitled Jīvēśvarabhēdabhaṅga complete and breaks off in the course of the second Paricchēda.

**Beginning:**

. . . . . पदाम्बुजं भज निजात्मबोधक्षर-
न्मरन्दशरजर्झरीकृतनतार्तिदावानलम् ।
. . . . . . . . . . . प्रकाश्याखिला-
नाचार्यं त्रिजगद्गुरुं प्रतिमुहुर्वाचस्पतिं तं नुमः ॥
त्यक्तुं नैव सुराद्दतः प्रभवति स्वस्यापि यो जीवति ।
• • • •
. . . . . . . . चन्द्रमा इव पयः पयोनिधेः ॥
पातिव्रतीवास्य शरीरधारिणी
तिम्माम्बिकाख्या सहधर्मचारिणी ।
• • • •
. . . . . . . . . . . . सेन पुष्टा
हृष्टा विशिष्टा जगति प्रतिष्ठाः ।

वेदान्तचिन्तासु निरन्तरायाः
स नीलकण्ठप्रभुरेष . . . . . . . ॥

* * * *

तस्मात् ब्रह्मैव स्वमायाविद्यया विवर्तेत इतीति । अस्य तत्त्वदीपनम् । एकमेव ब्रह्म अविद्यया जगदाकारेण विवर्तते चेत् तर्हि विद्यया अविद्याया (अपि वि) वर्तितत्वात् सकलमुक्त्यापात इत्याशङ्क्य मतभेदं दर्शयति । तत्रेति, वेदान्तव्याख्यातॄणां मध्य इत्यर्थः ।

* * * *

इत्थं जीवविविक्तेश्वरस्य ब्रह्मवादिसमयबहिर्भूतत्वात् तदभावे च च्छिन्नमूलद्रुमन्यायेन जगत्कर्तृत्वस्य सुतरामभावात् जगतः कारणं प्रधानापरनाम कथमज्ञानमित्येव ब्रह्मवादिभिः शरणीकरणीयम् । तथाच जगत्कारणांशे साङ्ख्यवेदान्तसिद्धान्तयोरभेद इति सिद्धम् ।

**Colophon:**

इति श्रीवेल्लालकुलसंभवेनोमामहेश्वरेण विरचिते वेदान्तसिद्धान्तसारे जीवेश्वरभेदभङ्गो नाम प्रथमः परिच्छेदः ॥

नन्वेवं कौन्तेयराधेयन्यायेन कृत्स्नस्यापि ब्रह्मणः स्वाविद्यया जीवभावः । तथाच जीवविविक्तस्सर्वज्ञः

**End:**

आत्मबोधप्रकरणेऽपि ।

एवं निरन्तरं कृत्वा ब्रह्मैवास्मीति वासना ।
हरत्यविद्याविक्षेपाद्रोगानिव रसायनम् ॥

इत्युक्तम् । भामत्यां च ब्रह्मणो नित्यापरोक्षत्वादनंशत्वाच्च प्रत्ययावृत्तिरनर्थिका यद्यपि, तथापि देहान्तारोप्यवशात् सांशमिव तदध्यासवशात्परोक्षमिव च ब्रह्म । तथाच प्रत्ययावृत्तिर्युक्तेत्युक्तम् । यस्य तु वेदान्तवाक्यजन्यावृत्तिश्चैतन्यविषया तस्य तु चैतन्यस्य नित्यापरोक्षत्वान्निरंशत्वाच्च प्रत्ययावृत्तिरनर्थिकैव ।

* * * *

उभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव स यथा सैन्धवघनो-रसबाह्यः कृत्स्नो रसः.

---

R. No. **1404.**

Palm-leaf. 15⅞ × 1⅓ inches. Foll. 129. Lines, 8 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. S. Gōpālācāriyar of Villiyambākkam.

(a) सामान्यनिरुक्तिविवेचनी.

SĀMĀNYANIRUKTIVIVECANĪ.

Foll. 1a—124a. Fol. 124b is left blank.

On the importance in the use of certain words and expressions in the Sāmānyanirukti, which is a portion of Gadādhara's Tattvacintāmaṇidīdhitiprakāśikā described under No. 4040 of the D.C.S. MSS., Vol. VIII. The work is also called Auttarapatra and Bengālipatra.

Complete.

**Beginning:**

अनुमितिपदस्य . . . . . सामान्यपरत्वेऽतिप्रसङ्ग . . . .
. . . . . . . . . . . . . . मात्रेणाप्यतिप्रसङ्गवारणसंभवात् ।
न च स्वरूपासिद्धिसङ्ग्राहकं तदिति वाच्यम् ।

* * * *

ननु परामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकघटकत्वे प्रकृतपक्ष-साध्यकानुमितित्वस्य कार्यतावच्छेदकत्वे प्रयोजनाभावेन तदवच्छिन्नकार्यता-घटितलक्ष(ण)स्यासंभवः ।

**End:**

ननु भेदप्रतियोगितावच्छेदकेषु धर्मेषु भेदत्वकल्पने लाघवमनपायमति-रिक्तभेदकल्पने तत्रानन्तपदार्थानां सम्बन्धस्य तस्य प्रतियोग्यादिषु सम्ब-

न्वस्य च कल्पनीयतया अत्र कल्पे गौरवमेवेति चेन्न । भेदप्रतियोगिता-वच्छेदकातिरिक्तमात्रमत्राभिप्रेतम् । न तु कुत्राप्यनन्तर्भावोऽपि तादृशभेद कूटवत्त्वप्रकारकप्रमाविशेषत्वाभावस्यैव तादृशभेदत्वं कल्पयितुमुचितमिति तादृग्ग्रन्थाशयात् भेदकूटस्य एकत्र द्वयमिति रीत्या मानाङ्गीकारेणैद भावप्रतियोगिताकाभावस्य जगदीशोक्तरीत्याऽभावस्वरूपत्वाङ्गीकारे तु तादृशभेदकूटप्रकारकप्रमाविशेष्यत्वाभावस्यापि प्रतियोगितावच्छेदकत्वसंभवाद-सङ्गतिरेवेति ध्येयम् ॥

---

(b) बाधकोडपत्रम्.

BĀDHAKRŌDAPATRAM.

Foll. 125a—129b.

Similar to the work described under No. 4273 of the D.C.S. MSS., Vol. VIII.

Incomplete.

**Beginning:**

उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तप्रकृतपक्षे प्रकृतसाध्य-वैशिष्ट्यबोधीयविषयतान्तःपातिप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपिता सती.

* * * *

स्वनिरूपितविषयताकत्वमिति समुदितार्थः । अथात्र स्वनिरूपित-प्रतिबध्यतायां निवेश्यं तावतैव वह्निव्याप्याभाववद्द्वयमावोभयवान् पर्वत इत्यादौ वह्निव्याप्यवत्पर्वते नाव्याप्तिः ।

**End:**

तादृशसत्प्रतिपक्षस्य च वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वं प्रति-बन्धकतायां निवेश्यते । तदेतत्कल्पद्वयमपि साधु । अनुमितिनिष्ठजन्यता-पदम् अनुमितित्वावच्छिन्नजन्यताप(रम्) ।

---

R. No. 1405.

Palm-leaf. 14¼ × 1⅝ inches. Foll. 29. Lines, 10 in a page. Grantha. Good.

Presented in 1914–15 by M.R.Ry. S. Gōpālacāriyar of Villiyambakkam.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadadharabhaṭṭācārya. Same work as that described under No. 4049 of the D.C.S. MSS., Vol. VIII.

Contains the Pañcalakṣaṇī only complete.

The name of the scribe and the date of transcription are given thus :

प्रजोत्पत्तौ पौषशुक्लतृतीयास्थिरवासरे ।
तातदेशिकदासेन लिखिता पञ्चलक्षणी ॥

---

R. No. 1406.

Palm-leaf. 16¾ × 1½ inches. Foll. 14. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1914-15 by M.R.Ry. D. V. Prakāśa Row Garu, Municipal Commissioner of Cocanada.

विजयविक्रमव्यायोगः.

VIJAYAVIKRAMAVYĀYŌGAḤ.

Foll. 1a – 14a. Fol. 14b contains a few lines of Narakāsuravijayavyāyōga.

By Āryasūryakavi of Kauṇḍinyagōtra. Same work as that described under R. No. 1367 *ante*.

The scribe of the original manuscript is said to be Lakṣmīnārāyaṇa, son of Kandarpa Sītārāma Śāstri, it having been completed on the 9th day of the dark fortnight of the Adhika Śrāvaṇa month in the year Krōdhi.

Complete.

---

R. No. 1407.

Palm-leaf. 16 × 1½ inches. Foll. 37. Lines, 9 in a page. Telugu. Good.

Presented in 1914-15 by M.R.Ry. D. V. Prakāśa Row Garu, Municipal Commissioner of Cocanada.

(a) वासवदत्ता.

VÂSAVADATTÂ.

Foll. 1a—21b.

By Subandhu. Same work as that described under R. No. 734(a) *ante*.

Complete.

---

(b) वासवदत्ताव्याख्या.

VÂSAVADATTÂVYÂKHYÂ.

Foll. 22a—37a. Fol. 37b is left blank.

Same work as that described under R. No. 821(b) *ante*.

Complete.

---

R. No. 1408.

Palm-leaf. 17¾×2½ inches. Foll. 84. Lines, 9 in a page. Telugu. Good.

Presented in 1914-15 by M.R.Ry. D. V. Prakâśa Row Garu, Municipal Commissioner of Cocanada

गौतमीमाहात्म्यम्.

GAUTAMÎMÂHÂTMYAM.

On the origin, sacredness and religious importance of the river Gautamî, which is presumably the same as the Gôdâvarî.

Contains Adhyâyas one to ninty-three as found in the Brahmapurâṇa and breaks off in the ninty-fourth Adhyâya thereof. The subject headings of these Adhyâyas are given below :—

| | |
|---|---|
| १. तीर्थभेदवर्णनम्. | ८. गङ्गावतरणम्. |
| २. गङ्गोत्पत्तौ शम्भुविवाहसम्बन्धः | ९. वाराहतीर्थवर्णनम्. |
| ३. ब्रह्मकमण्डलुदानम्. | १०. कपोततीर्थवर्णनम्. |
| ४. गङ्गामहेश्वरजटागमनम्. | ११. कार्त्तिकेयतीर्थवर्णनम्. |
| ५. विनायकगौतमव्यापारः. | १२. कृत्तिकातीर्थवर्णनम्. |
| ६. गौतम्यवतरणम्. | १३. दशाश्वमेधतीर्थवर्णनम्. |
| ७. तीर्थमाहात्म्यवर्णनम्. | १४. पैशाचतीर्थवर्णनम्. |

१५. क्षुधातीर्थवर्णनम्.
१६. इन्द्रतीर्थवर्णनम्.
१७. जनस्थानतीर्थवर्णनम्.
१८. भानुतीर्थवर्णनम्.
१९. गारुडतीर्थवर्णनम्.
२०. गोवर्धनतीर्थवर्णनम्.
२१. गालवतीर्थवर्णनम्.
२२. विश्वामित्रादितीर्थवर्णनम्.
२३. श्वेततीर्थवर्णनम्.
२४. शुक्रसञ्जीवनतीर्थवर्णनम्.
२५. इन्द्रतीर्थादिवर्णनम्.
२६. पौलस्त्यादितीर्थवर्णनम्.
२७. अग्न्यादितीर्थवर्णनम्.
२८. ऋणविमोचनतीर्थवर्णनम्.
२९. सुपर्णसङ्गमतीर्थवर्णनम्.
३०. पौरूरवसब्रह्मतीर्थवर्णनम्.
३१. मृगव्याधब्रह्मतीर्थवर्णनम्.
३२. शम्यादिदशतीर्थवर्णनम्.
३३. हरिश्चन्द्रादितीर्थवर्णनम्.
३४. पूर्णादिनदनदीवर्णनम्.
३५. प्रवरासङ्गमतीर्थवर्णनम्.
३६. वृद्धसङ्गमतीर्थवर्णनम्.
३७. गौतसौभाम्येडेश्वरादितीर्थवर्णनम्.
३८. चक्रतीर्थवर्णनम्.
३९. पिप्पलादितीर्थवर्णनम्.
४०. नागतीर्थवर्णनम्.
४१. नवमातृतीर्थवर्णनम्.
४२. ब्रह्मशिरोलिङ्गशिवतीर्थवर्णनम्
४३. विष्णुतीर्थवर्णनम्.
४४. शेषतीर्थवर्णनम् Incomplete.
४५ to ५७ Wanting.
५८. रामतीर्थवर्णनम्. (Wants the beginning).
५९. पुत्रतीर्थवर्णनम्.
६०. यमाग्नितीर्थवर्णनम्.
६१. तपस्तीर्थवर्णनम्.
६२. दैवतीर्थवर्णनम्.
६३. तपोवननदीसङ्गमेश्वरदेवीतीर्थादिवर्णनम्.
६४. आपस्तम्बसोमेश्वरादितीर्थवर्णनम्.
६५. सोमेश्वरतीर्थवर्णनम्.
६६. बाणादितीर्थवर्णनम्.
६७. यक्षिणीसङ्गमदुर्गादितीर्थवर्णनम्.
६८. शुक्लतीर्थवर्णनम्.
६९. चक्रतीर्थादिवर्णनम्.
७०. वाणीसङ्गमवागीश्वरादितीर्थवर्णनम्.

७१. मौद्गल्यविष्णुतीर्थवर्णनम्.
७२. लक्ष्मीतीर्थवर्णनम्.
७३. मान्वादितीर्थवर्णनम्.
७४. खड्गतीर्थवर्णनम्.
७५. अन्विन्द्रात्रेयदैतेयादितीर्थवर्णनम्.
७६. कपिलासङ्गमतीर्थवर्णनम्.
७७. Wanting.
७८. दैत्यदेवस्थानतीर्थवर्णनम्.
७९. सिद्धतीर्थवर्णनम्.
८०. पदोष्णीसङ्गमतीर्थवर्णनम्.
८१. मार्कण्डेयतीर्थवर्णनम्.
८२. कालाञ्जनादितीर्थवर्णनम्.
८३. अप्सरोऽयनगङ्गासङ्गमतीर्थवर्णनम्.
८४. पापनाशनतीर्थवर्णनम्
८५. कोटीश्वरच्छायातीर्थवर्णनम्.
८६. कुण्डलेश्वरादितीर्थवर्णनम्.
८७. मुक्तीश्वरतीर्थवर्णनम्.
८८. व्याधतीर्थवर्णनम्.
८९. मृतसञ्जीवनचक्षुस्तीर्थवर्णनम्.
९०. उर्वशीतीर्थवर्णनम्.
९१. सप्तगोदावरीपृथग्भावसमुद्रतीर्थवर्णनम्
९२. ऋषितीर्थवर्णनम्.
९३. गङ्गासागरसङ्गमवर्णनम्.

**Beginning:**

श्रीनारदः—

तपसां यज्ञदानानां तीर्थानां पावनं शुभम् ।
इति श्रुतं मया त्वत्तः तीर्थानां चरितं पुनः ॥

* * * *

श्रोतुमिच्छामि तत्सर्वं वद सत्यं सुरेश्वर ।
सर्वेषामेव तीर्थानां सर्वदा किं विशिष्यते ॥

ब्रह्मोवाच—

चतुर्विधानि तीर्थानि स्वर्गमर्त्यरसातले ।
दैवानि मुनिशार्दूल आसुराण्यार्षाणि च ॥

* * * *

यशसः फलभूत्यर्थं निर्मितानि मनीषिभिः ॥
स्वतो भूतानि दैवानि यत्र क्वापि जगत्त्रये ।
पुण्यतीर्थानि चान्यानि तीर्थभेदो मयोदितः ॥

**Colophon:**

इति श्रीब्रह्मपुराणे गौतमीमाहात्म्ये तीर्थभेदवर्णनं नाम प्रथमोऽध्यायः ।

**End:**

शृण्वत्सु लोकपालेषु जगादेदं स गौतमः ।
आवत्सागरगा देवी निस्सृता ब्रह्मणो गिरेः ॥
सर्वत्र सर्वदा शर्व स्थातव्यं देव(पूजिता) ।
गुणवन्ती महाप्राज्ञा गौतमी तु सदा नृणाम् ॥
सर्वत्र सर्वदा पुण्या को न्वन्याद्गुणकीर्तनम् ।
वक्तुं शक्तस्ततस्तस्मै नम इत्येवमुच्यते ॥

**Colophon:**

इति श्रीब्रह्मपुराणे गौतमीमाहात्म्ये गङ्गासागरसङ्गमवर्णनं नाम त्रिणवतितमोऽध्यायः ।

श्रीनारदः—

त्रिदेवत्यां सुरेशान गङ्गां ब्रूपे सुरेश्वर ।
ब्राह्मणानाहृतां पुण्यां जगतः पावनीं शुभाम् ॥

* * * *

निश्चेष्टोऽथ निरुत्साहः पतितः शोकसागरे ।
दिनावसाने शर्वर्यामुदिते चन्द्रमण्डले ॥
एकादश्यां शुक्लपक्षे तत्र याति विभीषणः ।

स तु ।

## R. No. 1409.

Palm-leaf. 15¾ × 1½ inches. Foll. 22. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1914–15 by M.R.Ry. D. V. Prakāśa Row Garu, Municipal Commissioner of Cocanada.

### रामाभ्युदयचम्पुः.

### RĀMĀBHYUDAYACAMPUḤ.

A work in prose and verse based on the story of Rama: by Rāma of Dēvulapalli family.

The portion contained in this manuscript begins with the description of Ayōdhya and concludes with the birth of Rāma. The leaves are wrongly arranged and not numbered properly.

Incomplete.

**Beginning:**

अस्ति स्वस्तिकृतिप्रतीतहृदयैर्ध्वस्तामिषा(खिला)न्यस्तम-
स्तोमार्कान्वयवास्तवस्तुतिपरैरिन्द्रादिसर्वामरैः ।
न्यस्तस्वस्तरुशस्तनिस्तुलसुमस्तोमैस्तरां विस्तुत-
स्फारस्फूर्तिकरत्नसौधमधुरा साकेतनामा पुरी ॥

इत्थमतिवृत्ते प्रवृत्ते यतिवृत्ते दुर्वेदनिर्वेदक्लवोदीर्णविवर्णतास्वेवाधिगत-जीर्णरुरुधूसररोमसवर्णतासु, उच्चतरतरूच्चलदाकुलाकुलशकुनकुलकलकलालापकलापमुखरितमुखास्ववसृतास्वाशासु विशालतामधिशायिनी(नि)रोधःकुहरे विरहविधुरकोकवधूशोकधूममण्डलितकर्मन्दिचिताज्वलनज्वालागलनादिव-विलयमुपपतीषूद्वतीषु . . . . . . . . . . . .

वृतो नु गौरेष नवातपप्रभाकरम्भकौसुम्भितसत्परिच्छदैः ।
पुरं प्रवासच्छविवर्णजङ्गमागमान्तरुल्लासि मधुर्यदागमत् ॥

श्रीरामाभिधदिव्यतारकपरब्रह्माङ्घ्रिपद्मालिना
श्रीमद्देवुलपिल्लिवंशमणिना रामाख्यसङ्ख्यावता ।

श्रीरामाभ्युदयाभिधे विरचिते सम्यग्बुधेष्टप्रदे
चम्पूकल्पतरौ रसोज्वलतनुर्गुच्छोऽयमादिश्शुभः ॥

**End:**

सरस्वत्यर्कतनये सुमित्रां जाह्नवीमिव ।
चक्रुः पायसभागाभ्यां परभागवतीमुभे ॥

* * * *

विजयशरदि चैत्रे शुक्लपक्षे नवम्यामदितिभयुजि लग्ने कर्कटे मेषभाजि ।
सवितरि खचराणां पञ्चके चोच्चसंस्थे हरिरुदभवदुर्व्यामिन्दुयुक्ते च जीवे ॥
तनयं जनयामास तनया कोसलेशितुः ।
प्राचीवाथ—

---

R. No. **1410.**

Palm-leaf. 12½ × 1½ inches. Foll. 248. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1914–15 by M.R.Ry. G. Arāvamuda Ayyangar Avargal of Purasavakkam.

The first 6 foll. contain a list of some of the Vratas, etc.

(*a*) घटस्फोटविधिः.

GHAṬASPHŌṬAVIDHIḤ.

Foll. 7*a*—9*b*.

Incomplete.

Similar to the work described under No. 3057 of the D.C.S. MSS., Vol IV.

**Beginning:**

क्वचित्तु जीवतोऽप्यन्त्यकर्माशौचं कार्यम् । यथा प्रायश्चित्तानिच्छोः पतितस्य घटस्फोटे "पतितस्योदकं कार्यं सपिण्डैः बान्धवैस्सह ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत:(त्वृत्विग्)गुरुसन्निधौ" ॥
दासीघटमपां पूर्णं पर्यस्येत् प्रेतवत्सदा ।
अहोरात्रमुपासीनः आशौचं बान्धवैस्सह ॥

इति मनूक्तेः.

**End:**

सर्वाभावे धर्मपुत्रो वा कार्यः—

अपुत्रेण सुतः कार्यः यादृक्तादृक्प्रयत्नतः ।

पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च ॥

इति व्यासवचनात्.

---

(b) निर्णयसिन्धुः.

NIRṆAYASINDHUḤ.

Foll. 10a—248a. Fol. 248b is left blank.

By Kamalākara Bhaṭṭa, son of Rāmakṛṣṇa Bhaṭṭa. Same work as that described under No. 3128 of the D.C.S. MSS., Vol. VI.

Contains the Paricchēdas one and two complete and the third incomplete.

---

R. No. 1411.

Palm-leaf. 16 × 1¼ inches. Foll. 170. Lines, 6 in a page. Grantha. Good.

Presented in 1914–15 by M.R.Ry. G. Āravamuda Ayyangar Avargal of Purasavakkam.

Two foll. are left blank.

विष्णुपुराणम्—आत्मप्रकाशिकासहितम्.

VIṢṆUPURĀṆAM WITH ĀTMAPRAKĀŚIKĀ.

The commentary is also called Svaprakāśikā. By Śrīdharasvāmin. Same work as that described under No. 2286 of the D.C.S. MSS., Vol. IV, Part I.

Wants the beginning. Contains from the first Adhyāya of the third Aṁśa to the end of the fourth Aṁśa.

The manuscript is said to have been copied by Suppa Śastri of old Vellore.

## R. No. 1412.

Palm-leaf. 15¾ × 1½ inches. Foll. 127. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1914–15 by M.R.Ry. Ārāvamuda Ayyangar Avargal of Purasawakkam.

Two leaves are wanting in the middle.

रामायणव्याख्या—रामायणदीपिका.

RĀMĀYAṆAVYĀKHYĀ—RĀMĀYAṆADĪPIKĀ.

Same work as that described under R. No. 119(*a*) *ante*. By Vaidyanāthadīkṣita.

Breaks off in the forty-sixth Sarga of the Āraṇyakāṇḍa and contains the Kiṣkindhākāṇḍa complete.

The name of the scribe and the date of transcription are given thus:

विरोधिकृन्नामसंवत्सरं कृत्तिकामासि दशमीदिने सौम्यवारे श्रीमद्भूशरण्यपुरवासिना वेङ्कट्रामशास्त्रिणा किष्किन्धाकाण्डदीपिका लिखिता ॥

---

## R. No. 1413.

Palm-leaf. 13¾ × 1½ inches. Foll. 115. Lines, 9 in a page. Grantha. Much injured.

Presented in 1914–15 by M.R.Ry. Ārāvamuda Ayyangar Avargal of Purasawakkam.

(*a*) वृद्धाचलमाहात्म्यम्.

VṚDDHĀCALAMĀHĀTMYAM.

Foll. 1*a*—48*b*.

On the holiness and religious importance of the Śiva shrine at Vṛddhācala also called Ciragiri and the river Maṇimuktā flowing by its side.

Complete; as found in Adhyāyas 1—17 of the Brahmakaivartapurāṇa.

**Beginning:**

वन्दे महेश्वरं देवं विघ्नेशं षण्मुखं गुहम् ।
गणेशं नन्दिमुख्यांश्च शिवभक्तान्महामुनीन् ॥

उक्तं समस्तं भवतां महात्मनां माहात्म्यमेतद्धि कवेरजायाः ।
वृद्धाचलस्यापि मुने प्रभावं त्वं वक्तुमर्हस्यखिलं च मह्यम् ॥
. . . रेन्द्रेण सुमन्तुरित्थं मुनिः प्रसन्नः करुणार्द्रचेताः ।
तं देववर्माणमुवाच साधु पृष्टस्त्वया धर्मकथाप्रसङ्गः ॥

* * * *

सुमन्तुः—
वृद्धाचलो नाम गिरिः प्रसिद्धः शिवप्रियस्सर्वमहीधरेभ्यः ।
अस्त्यत्र भूमौ परिशोभमानो देव . . . . . . . . . ॥

* * * *

चिरगिरिरपि . . . गोपर्वतश्चापि पूज्यो
हिमगिरितनयेयं रत्नमुक्तानदीयम् ।
इति भजति हि यो . . . . . . . . .
. . . . . . . . . प्राप्नुयान्मोक्षलक्ष्मीम् ॥

**End:**

इति परमकृपाया संवृतो नाथशर्मा
चिरधरणिधरेशो नाममाहात्म्यमुक्त्वा ।
नरवर विररामामा . . . . . . . .
. . . . . . . . ति च गौर्यै प्राह देवो महेश ॥
त्वमपि च नृप गच्छेः श्रेयसे ते यदिच्छा
चिरगिरिमनवद्यां स्नाहि तावर्चयेशौ ।
प्रवितरत विविक्तं शं कृपो . . . . . .
. . . . . . मतर्क्यं यास्यसीशास्पदं तत् ॥

**Colophon:**

इति श्रीब्रह्मकैवर्तकाख्ये महापुराणे तीर्थप्रशंसायां पार्वतीपरमेश्वर-संवादे अनवद्यानन्द . . . . . . . . . . . . . . सिकथनं नाम सप्तदशोऽध्यायः ॥

इति वृद्धगिरिमाहात्म्यं समाप्तम् ॥

---

(*b*) कमलालयमाहात्म्यम्.

KAMALĀLAYAMĀHĀTMYAM.

Foll. 49*a*—115*b*.

On the sanctity of the tank Kamalālaya (literally the abode of lotuses) and the famous Śiva shrine close by in Tiruvālūr in the Tanjore district.

Breaks off in the forty-seventh Adhyāya; as found in the Skāndapurāṇa.

**Beginning:**

वागीशाद्याः . . . गजाननम् ॥

ऋषयः—

त्वत्तः श्रुतानि तीर्थानि स्थानानि विविधानि च ।
शुभानि . . . . . . . . . . . . . . ॥
तेषा(म्पुण्य) तमे क्षेत्रे द्वे एव कथिते त्वया ।
सर्वसिद्धिकरे स्थाने काशी च कमलालयः ॥
तत्र काशी यथोत्पन्ना यथा सिद्धिं प्रयच्छति ।

* * * *

इदानीं श्रोतुमिच्छामस्त्वन्मुखात्कमलालयम् ।
कीदृशं तत्कथं वात्र सिद्धयो वसतां नृणाम् ।
के विशेषाश्च तत्रापि . . . . . . . . ॥

* * * *

इति मुनिभिरुदारैस्स्तूयमानो वचोभिः
प्रभुरवददतीव प्रीतिमान् पद्मयोनिः ।
परमिव परितोषं कस्य भूतार्थवाचः
. . . . . . . . . यमाणस्य पुंसः ॥

**Colophon:**

इति श्रीमत्स्कान्दे पुराणे कमलालयमाहात्म्ये प्रथमोऽध्यायः ॥

**End:**

आगत्य मर्त्यलोकेभ्यः श्रुतं ते नियमाद्यथा ॥

एतद्यः शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
सर्वपापविनिर्मुक्तो जीवलोकमवाप्नुयात् ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे तृतीयपरिच्छेदे कमलालयमाहात्म्ये पञ्चचत्वारिंशोऽध्यायः ॥

* * * *

**Colophon:**

इति श्रीस्कान्दे पुराणे तृतीयपरिच्छेदे कमलालयमाहात्म्ये षट्चत्वारिंशोऽध्यायः ॥

(तदा देवा) अयाचन्त शोषणं च पयोनिधेः ।
ततस्तानब्रवीद्देवानगस्त्यो भगवानृषिः ॥

---

R. No. **1414.**

Śritāla. 8¾ × 2¼ inches. Foll. 47. Lines, 12 in a page. Grantha. Good.

Presented in 1914–15 by M.R.Ry. Ārāvamuda Ayyangar Avargal of Puraswakkam.

(*a*) **शिवकेशादिपादान्तवर्णनम्.**

ŚIVAKEŚĀDIPĀDĀNTAVARṆANAM.

Foll. 1*a*—7*b*.

A eulogistic description of the various parts of the body of Śiva beginning with the hair on the head and ending with the feet: by Śaṅkarācārya.

Complete.

**Beginning:**

कल्येऽपर्णया देव्या कुटुम्बिकरुणाकरम् ।
लम्बोदरसुराध्यक्षं स्कन्दपुत्रं परं महः ॥

देयासुर्मूर्ध्निराजत्सरसमुरसरित्पान्तपर्यन्तनिर्यत्-
प्रांशुस्तम्बाः पिशङ्गास्तुलितपरिणतारक्तशालीलतापः ।

दुर्वारावर्तगर्तश्रितनिखिलजनोद्धारणे रज्जुभूता
घोराघोर्वीरुहालीदहनशिखिशिखाः शर्म शार्वाः कपर्दाः ॥

**End:**

दीप्यन्मूर्धेन्दुखण्डः शितशिखनखरच्छिन्नलोकेशमुण्डः
कम्राकारोरुदण्डः प्रलयहुतवहप्रस्फुरद्बाहुदण्डः ।
चण्डीशोद्योतशौण्डः स्वभुजनियमिताखण्डबाणीधवाण्डः
खण्डीभूतारिखण्डः कलयतु भगवान् शर्म शम्भुः प्रचण्डः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिता शिवकेशादिपादपरागपर्यन्तस्तुतिस्समाप्ता ।

श्रीमत्काञ्चिक्षेत्रान्तर्गतवेलाप्पाकाग्रहारवासिना भगवद्भक्तेन अय्याख्येन वीरराघवेण लिखितेयं शिवस्तुतिः संपूर्णा ॥

---

(*b*) अपस्माररोगहरप्रयोगः.

APASMĀRARŌGAHARAPRAYŌGAḤ.

Foll. 7*a*—10*b*. Fol. 8*b* is left blank.

On the performance of certain pacificatory ceremonies and the giving of certain gifts held to be efficacious in the curing of diseases like epilepsy, etc.

This forms the 29th Taraṅga of the Karmavipāka forming part of the Mahārṇavatantra

**Beginning:**

धूर्तोऽपस्माररोगः स्यात् स तद्दोषस्य शान्तये ।
ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणाम् ॥

ब्रह्मकूर्चलक्षणं कृच्छ्रप्रकरणे दर्शितम् । धेनुदानमन्त्रस्तु नवग्रहयज्ञप्रकरणे दर्शितः । अथ प्रकारान्तरेणापस्मारहरं कर्मविपाकसङ्ग्रहे—

गुरौ स्वामिनि वा यस्तु प्रतिकूलं करोति यः ।
सोऽपस्मारी भवेत्तत्र कुर्याच्चान्द्रायणं नरः ॥
सदसस्पतिमन्त्रेण चर्वाज्यं जुहुयात्ततः ।
कया न इति सूक्तं च जपेत् ब्राह्मणतर्पणम् ।
कुर्याद्धिरण्यदानं च शक्त्या रोगस्य शान्तये ॥

चान्द्रायणलक्षणं कृच्छ्रप्रकरणे द्रष्टव्यम् । चर्वाज्यमिति मिलितमेव होमसाधनेन पृथक् पृथक् । होमसङ्ख्या च रोगानुसारेणाष्टोत्तरशताद्ययुतान्ताः कल्प्याः । एवं सूक्तजपेऽपि ।

**End:**

अथापस्मारहरमूर्तिदानम् । तल्लक्षणं च अनुक्तेषु च रोगेष्वित्यारभ्य शूलरोगप्रकरणे दर्शितमेवाभिज्ञेयम् । पूजाविधिस्तु परिभाषायां रोगप्रतिमादानविधौ अन्तको देवता तत्रेत्यादिना प्रदर्शितम् । इत्यपस्माररोगहरमूर्तिदानम् ॥

**Colophon:**

इति विंशतिस्तरङ्गः ॥

---

(c) ईशावास्योपनिषत्.

ĪŚĀVĀSYOPANIṢAD.

Foll. 11*a* and 11*b*.

Same work as that described under No. 300 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(d) कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Foll. 11*b*—16*a*.

Same work as that described under No. 334 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(e) प्रश्नोपनिषत्.
PRAŚNÓPANIṢAD.

Foll. 16a—19a.

Same work as that described under No. 610 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(f) मुण्डकोपनिषत्.
MUṆḌAKÓPANIṢAD.

Foll. 19a—21b. Foll. 22 to 25 are left blank.

Same work as that described under No. 713 of the D.C.S. MSS., Vol. I, Part III.

Incomplete.

---

(g) ईशावास्योपनिषद्भाष्यम्.
ĪŚĀVĀSYÓPANIṢADBHĀṢYAM.

Foll. 26a—34b.

By Śaṅkarācārya. Same commentary as that described under No. 310 of the D.C.S. MSS., Vol. I, Part III.

Complete.

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-
श्रीमच्छङ्करभगवत्पादकृतौ वाजसनेयिसंहितोपनिषद्भाष्यं समाप्तम् ॥

---

(h) ईशावास्योपनिषद्भाष्यटिप्पणम्.
ĪŚĀVĀSYÓPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 34b—42b.

By Śivānandayati. Same work as that described under No. 312 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(i) केनोपनिषद्भाष्यम्.

KĒNŌPANIṢADBHĀṢYAM.

Foll. 43a—47b.

By Śaṅkarācārya. Same work as that described under No. 387 of the D.C.S. MSS., Vol. I, Part III.

Incomplete.

---

R. No. 1415.

Palm-leaf. 11⅝ × 1¼ inches. Foll. 151. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1914-15 by M.R.Ry. E. R. Śrinivāsarāghavācarya, Temple Doctor, Rāmēśvaram.

(a) महागणपतिकवचम्.

MAHĀGAṆAPATIKAVACAM.

Foll. 1a—4a. Fol. 4b is left blank.

This Kavacamantra is addressed to Gaṇapati or Vināyaka. It is said to have been revealed by Viṣṇu to Brahman; and its due repetition is held to be efficacious in removing obstacles of various kinds and in the accomplishment of the four principal aims of life, viz., Dharma, Artha, Kāma and Mōkṣa.

Complete; as found in the Rudrayāmala.

**Beginning :**

विश्वोद्भतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशकाय ।
उमासुतं देववरप्रसादं हरस्य पुत्रं गणवृन्दसेव्यम् ॥
सुरासुराणां परमं पवित्रं विनायकं सदा शरणमहं प्रपद्ये ।

श्रीगणाधिपतये नमः, श्रीमहागणपतये नमः—

श्रीपार्वत्युवाच—

मन्नाथ जगतां नाथ मम प्रेरणकारण ।
गणेशस्य तु यन्मन्त्रं श्रुतं देव महेश्वर ॥
इदानीं श्रोतुमिच्छामि कवचं तस्य दुर्लभम् ।
तद्वदस्व दयासिन्धो कृपया मम शङ्कर ॥

ईश्वर उवाच—

श्रृणु देवि महाभागे गणेशकवचं परम् ।
यत्कृत्वा पठनात् सद्यो विघ्ननाशो भविष्यति ॥
विष्णुना कथितं पुण्यं कवचं ब्रह्मणे मुदा ।
पठित्वा कृतवान् सृष्टिमेकभावं पितामहः ॥

* * * *

अस्य श्रीमहागणपतिकवचस्तोत्रमहामन्त्रस्य श्रीमहेश्वर ऋषिः, विराट् छन्दः, श्रीमहागणपतिर्देवता । श्रीमहागणपतिप्रसादसिद्ध्यर्थं धर्मार्थकाममोक्ष-चतुर्विधफलपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ॥

ओं गं पातु मस्तकं देवो गणनाथो महाबलः ॥
एकाक्षरो महामन्त्रः सर्वदेवनमस्कृतः ।
ओं ह्रीं ह्रीं क्लीं च वलनं गौं गं गणपते हृदम् ॥

* * * *

इति ते कथितं भद्रे कवचं परमाद्भुतम् ।
पठित्वा धारयित्वा च सर्वमाशु समालभेत् ॥

**End:**

ज्ञात्वा तु कवचं यो वै जपेद्भक्तिपुरस्सरम् ॥
जपान्ते कवचं दिव्यं पठेन्नित्यमत्रिय(त)न्द्रितः ।
सर्वान् कामान् समासाद्य गणेशस्य प्रियो भवेत् ॥

**Colophon:**

इति श्रीरुद्रयामले श्रीपार्वतीपरमेश्वरसंवादे महागणपतिकवचं समाप्तम्॥ संपूर्णमस्तु ॥

---

(*b*) महागणपतिपञ्चावरणस्तोत्रम्.

MAHĀGAṆAPATIPAÑCĀVARAṆASTŌTRAM.

Foll. 5*a*—12*b*.

A eulogy on God Gaṇapati represented by a mystic diagram with five enclosures containing subsidiary deities.

Complete; as found in the Mantraprakāśikā.

**Beginning:**

सृष्टी(ष्टिस्थि)त्युपसंहारतिरोधानानुग्रहात्मकम् ।
महागणपतिं वन्दे पञ्चावरणसंयुतम् ॥
अरुणं वारणमुखं दशबाहुं त्रिलोचनम् ।
प्रियालिङ्गितसङ्गात्रं महागणपतिं नुमः ॥
सर्गस्थितिलयादीनां विश्वस्यास्यैककारणम् ।
महागणपतिं ध्यायेत् पञ्चावरणसंमितम् ॥

**End:**

मध्ये तथा कुण्डवरस्य तुल्या(ल्यं) प्रागुक्तरूपं गणनाथमिष्ट्वा ।
अग्निं समाधाय पयोघृताढ्या(भ्या)मुन्मत्तपुष्पैरपि शर्कराभिः ॥
क्षौद्रेण वान्येन पृथक् क्रमेण हुत्वा(ता)नि लक्षाण्यपि कुण्डमध्यात् ।
बेतालकाभ्यां गुलिकां लभेत तां धारय स्यादणिमादिसिद्धिः ॥
एवं खड्गाजनपादुकाभ्यां यद्येतदिष्टं लभते तु मन्त्री ।
किन्तेन लभ्यं भुवनत्रयेऽस्मिन् नास्त्येव तत्साधकपुङ्गवस्य ॥

**Colophon:**

इति श्रीमन्त्रप्रकाशिकायां महागणपतिपञ्चावरणस्तोत्रमन्त्रयन्त्रोद्धार-होमप्रकारस्समाप्तः ॥ सम्पूर्णः ।

There are some Stōtras and Mantras relating to Vināyaka in the 13th fol.

---

(c) महागणपतिस्तवः.

MAHĀGAṆAPATISTAVAḤ.

Foll. 14a—17b.

Same work as that described under No. 9402 of the D.C.S. MSS., Vol. XVIII, wherein this work has been mentioned as Gaṇapatimantrākṣarāvalistōtra in the list of other works.

Complete.

**End:**

अग्रे तु बिल्वतरुमूलरमारमेशौ तद्दक्षिणे वटजुषौ सउमावृषाङ्कौ ।
पृष्ठे तु पिप्पलजुषौ रतिपुष्पबाणौ सव्ये प्रियङ्गुसजुषौ घृतभूवराहौ ॥

**Colophon:**

इति श्रीमहागणपतिमन्त्रावलिस्तोत्रं संपूर्णम् ॥

---

(*d*) त्रिपुराप्रातर्भजनम्.

TRIPURĀPRĀTARBHAJANAM.

Foll. 17*b*—18*b*.

Five stanzas addressed in praise of Tripurā, who is a manifestation of Śakti, and intended to be repeated in the early morning.

Complete.

**Beginning:**

प्रातस्स्मरामि भजतामभयङ्करं तं
पादारविन्दमतिसुन्दरमम्बिकायाः ।
दुस्सो(स्व)प्रदोषहरणं करणं सुखानां
सु स्सो(स्व)प्रबोधमखिलौघनिबर्हणं च ॥

**End:**

यः श्लोकपञ्चकमिदं पठति प्रभाते
धर्मादिदं परहितं कथितं हरेण ।
यस्मिन्ददाति पदवीमणिमादिरूपां
दुर्गा तपोभिरचलां त्रिपुरा भा(भ)न(वा)नी ॥

**Colophon:**

इति श्रीत्रिपुरसुन्दरीप्रातर्भजनपञ्चकं संपूर्णम् ॥

One eulogistic stanza on the goddess Dēvī is found at the end of the colophon

---

(*e*) महात्रिपुरसुन्दरीत्रैलोक्यमोहनकवचम्.

MAHĀTRIPURASUNDARĪTRAILŌKYAMŌHANA-KAVACAM

Foll. 19*a*—23*b*.

Similar to the work described under No. 6335 of the D.C.S MSS., Vol. XIII.

Complete; as found in the Rudrayāmala.

**Beginning:**

देवदेव जगन्नाथ सर्वलोकैकशङ्कर ।
शिव कारुण्यजलधे जगद्रक्षणकारण ॥
श्रीमत्त्रिपुरसुन्दर्या या विद्या भुवि दुर्लभम् ।
कृपया कथितं सर्वं श्रुतश्चाधिगतं मया ॥
प्राणनाथाधुना ब्रूहि कवचं मन्त्रविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः कथितं पुरा ॥

**End:**

इदं कवचमावृत्त्या प्रत्यहं प्रजपेन्मनुम् ।
सर्वसिद्धिमवाप्याथ शिवेन समतां व्रजेत् ॥

**Colophon:**

इति श्रीरुद्रयामले श्रीपार्वतीपरमेश्वरसंवादे श्रीत्रैलोक्यमोहनकवचं संपूर्णम् ॥

The scribe adds the following stanzas:—

श्रीरामेश्वरवासेन श्रीवामदेवगुरुसूनुना ।
नरसिंहलिखितं कवचं परम् ॥

---

(*f*) तुरीयाषोडशीश्रीराजराजेश्वरीकवचम्.

TURĪYĀṢOḌAŚĪŚRĪRĀJARĀJĒŚVARĪKAVACAM.

Foll. 24*a*—29*b*.

This Kavacamantra is addressed to the goddess Rājarājēśvarī, who is a manifestation of Śakti and who is represented by a prayer-formula consisting of sixteen syllables.

Complete.

This manuscript work is said to have been copied by Narasiṁhan, son of Vāmadēva Gurukkaḷ.

**Beginning:**

कैलासशिखरे रम्ये देवदेवं जगद्गुरुम् ।
शङ्करं परिपप्रच्छ कुमारः शिखिवाहनः ॥

श्रीस्कन्द उवाच—

श्रीगुरो जनका मह्यं पुत्रवात्सल्यवर्धन ।
कवचं षोडशाक्षर्या वद मे परमेश्वर ॥

श्रीईश्वर उवाच—

श्रृणु पुत्र महाभाग कवचं मन्त्रविग्रहम् ।
गोप्यात् गोप्यतरं गोप्यं गुह्याद्गुह्यतरं महत् ॥
तव स्नेहात् प्रवक्ष्यामि नाख्यातं यस्य(कस्य)चित् ।
ब्रह्मेशविष्णुशक्रादीन् मया यत् कथितं पुरा ॥

* * * *

अस्य श्रीकवचस्यास्य ऋषिरानन्दभैरवः ।
श्रीविद्या देवता छन्दो गायत्रीनृचि वृत्तिकम् ॥
रमा बीजं परा शक्तिर्वाग्भवं कीलकं स्मृतम् ।
मम सर्वार्थसिद्ध्यर्थे जपे तु विनियोगतः ॥

**End:**

इति परमरहस्यं सर्वयन्त्रार्थसारं
लभति परमभक्त्या निश्चलं निर्मलत्वम् ।
विलसति भुवि मध्ये पुत्रपौत्राभिवृद्धिं
धनसकलसमृद्धिं भोगमोक्षप्रदं च ॥

**Colophon:**

इति श्रीमन्त्रचूडामणौ श्रीशिवस्कन्दसंवादे त्रैलोक्यविजयाभेदं नाम तुरीयाषोडशीश्रीराजराजेश्वरीमहात्रिपुरसुन्दरीकवचं संपूर्णम् ॥

---

(*g*) महात्रिपुरसुन्दरीसौभाग्यकवचम्.

**MAHĀTRIPURASUNDARĪSAUBHAGYAKAVACAM.**

Foll. 30*a*—36*b*.

Similar to the work described under No. 7593 of the D.C.S. MSS., Vol. XIV.

Complete; as found in the Nityāsōḍaśikārṇava forming part of the Vāmakēśvaratantra.

**Beginning:**

कैलासशिखरे रम्ये सुखासीनं सुरेश्वरम् ।
गिरिशं गिरिजा नत्वा स्तोत्रं वेदार्थगर्भितम् ॥

* * * *

श्रीईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि सुन्दरि प्राणवल्लभे ।
सौभाग्यविद्याकामेशि सौन्दरि त्रिपुरा परा ॥

* * * *

अस्य श्रीराजराजेश्वरीमहात्रिपुरसुन्दरीसौभाग्यकवचस्तोत्रमहामन्त्रस्य श्रीमहेश्वर ऋषिः, देवी गायत्री छन्दः श्रीराजराजेश्वरीमहात्रिपुरसुन्दरी-देवता ।

**End:**

आबालमहिला भूपाः किमु मायाविमोहिताः ।
सर्वकार्याणि सिध्यन्ति पूजयेत् सुन्दरी सदा ॥

साक्षात् त्रिपुरसुन्दर्याः संपूजावल्लभः प्रभुः ।
स एवानन्दचिरू(द्रू)पा भैरवस्समतां व्रजेत्(?) ॥

**Colophon:**

इति श्रीवामकेश्वरतन्त्रे सर्वतन्त्रोत्तमोत्तमे नित्याषोडशिकार्णवे इह रूपाष्टकप्रस्तारे श्रीसौभाग्यविद्येश्वरीराजराजेश्वरीमहात्रिपुरसुन्दरेश्वरीसौ-भाग्यकवचं संपूर्णम् ॥

On fol. 37a two eulogistic stanzas on Tripurasundarī are found after the colophon.

(*h*) त्रिपुरसुन्दरीमालामन्त्रः.

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Foll. 37*b*—41*a*. Fol. 41*b*. is left blank.

Same work as that described under No. 6345 of the D.C.S. MSS., Vol. XIII.

Complete; as found in the Viśvasārōddhāra.

**End:**

शुद्धा नमोन्तस्वाहान्ततर्पणान्ता जपान्तिका ।
शक्तिमाला पञ्चधा स्याच्छिवमाला च तादृशी ॥
द्वन्द्वमाला पञ्चधा स्यान्माला पञ्चदशे(शी)रिता ॥

**Colophon:**

इति श्रीविश्वसारोद्धारे सर्वतन्त्रोत्तमे मन्त्रखण्डे श्रीपार्वतीपरमेश्वर-संवादे श्रीसहस्राक्षरीराजराजेश्वरीमहात्रिपुरसुन्दरीमालामन्त्रं संपूर्णम् ॥

One eulogistic stanza on Dēvi is found after the colophon.

---

(*i*) षोडशमकरन्दस्तवराजस्तोत्रम्.

ṢŌḌAŚAMAKARANDASTAVARĀJASTŌTRAM.

Foll. 42*a*—45*b*.

Same work as that described under No. 10807 of the D.C.S. MSS., Vol. XIX, but with different end and colophon as given below. In the colophon it is stated that the author of the work is Paraśivānandanātha, whereas, according to the colophon found at the end of the work referred to under No. 10807, the authorship is attributed to Kālidāsa.

Complete in sixteen stanzas including the Phalaśruti stanza; as found in the Rudrayāmala.

**End:**

पूजयित्वा विधानेन महात्रिपुरसुन्दरीम् ।
इमं स्तवं पठित्वा तु देवसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीरुद्रयामले श्रीपरशिवानन्दनाथविरचिते (तं) श्रीमहात्रिपुरसुन्दरीषोडशमकरन्दस्तवं समाप्तम् ॥

---

(*j*) कल्याणस्तवराजः.

KALYĀṆASTAVARĀJAḤ.

Foll. 46*a*—48*b*.

Same work as that described under No. 10732 of the D.C.S. MSS., Vol. XIX, but with two different stanzas in the end and with colophon as given below. Its authorship is attributed to Manmatha.

Complete.

**End:**

कुवलयदलनीलं बर्बरं स्निग्धकेशं
पृथुतरकुचभारं कान्तकान्तावलग्नम् ।
किमिव बहुभिरुक्तैस्त्वत्स्वरूपं परन्वा(स्तात)
सकलभुवनमातः सन्ततं संनिधत्ताम् ॥
माणिक्यमङ्गलितसूत्रितवालि(ल)केन
मन्दस्मितेन मदनारुणपङ्कजेन ।
कालान्तदीर्घमणिमङ्गलसूत्रकण्ठी
मातां विशालनयनां मनसा स्मरामि ॥

**Colophon:**

इति श्रीमन्मथेन विरचितं श्रीकल्याणस्तवराजं सम्पूर्णम् ॥

---

(*k*) चिन्तामणिस्तवराजः.

CINTĀMAṆISTAVARĀJAḤ.

Foll. 48*b*—60*b*.

This Mantra is addressed to Lalita, who is a manifestation of Śakti, and its repetition is held to enable one to accomplish one's desires.

Complete; as found in the Brahmāṇḍōttarakhaṇḍa.

**Beginning:**

कल्याणायास्तु मे कापि वासनावारणाकृतिम्(:) ।
नीपारुणनिजाङ्कस्थं कामसौभाग्यकन्दलीम्(?) ॥
तन्महः कलये शोणं तरुणेन्दुवतंसकम् ।
पाशाङ्कुशेक्षुकोदण्डपञ्चबाणलसत्करम् ॥

**End:**

यत्र यत्र चरतो यदा दृशौ तत्र तत्र धुरि मे सदा भवेत् ।
दैवतं किमपि दैन्यमोचकं पाटलं परिचितेक्षुकार्मुकम् ॥
ललितायाः स्तवं पद्यैर्ललितैरिह निर्मितः ।
पठतामन्वहं वक्तुं फलं सैव प्रगल्भते ॥

**Colophon:**

इति श्रीब्रह्माण्डोत्तरखण्डे श्रीललितोपाख्याने स्तोत्रखण्डे श्रीहयग्रीवागस्त्यसंवादे श्रीमच्चिन्तामणिस्तवराजः समाप्तः ॥

---

(*l*) चिन्तामणिस्तोत्रम्.

CINTĀMAṆISTŌTRAM.

Foll. 61*a*—67*b*.

Similar to the above. Its due repetition is held to be efficacious in curing one from diseases like epilepsy.

Complete; as found in Rudrayāmala.

**Beginning:**

अनर्घ्य(र्घ)मणिभूषणोज्वलमुदारमाबभ्रम(पद्मभ्रमु)-
भ्रमज्जगदधीश्वरं धृतशरेक्षुचापं परम् ।
समस्तसुखसिद्धिदं सकललोकसञ्जीवनं
सदोदितमुपास्महे किमपि वस्तु सर्वारुणम् ॥

* * * *

द्विपञ्चसिध्यै(द्वै)रणिमाप्रधानैः रत्नासनैः रक्तदुकूलवर्णैः ।
सार्धं च चिन्तामणिना कराभ्यां वराभयाभ्यां दधतीं च मुद्राम् ॥

**End:**

चिन्तामणिस्तोत्रमिदं पठिष्यन् पापैरपस्मारकृतैश्च रोगैः ।
मुक्तिश्चतुर्वर्गफलं लभेत गुरोः कृपालाभवशान्मनुष्यः ॥

**Colophon:**

इति श्रीरुद्रयामले श्रीमच्चिन्तामणिस्तोत्रं संपूर्णम् ॥

---

(m) सौन्दर्यलहरी.

SAUNDARYALAHARI.

Foll. 68*a*—85*b*.

Same work as that described under No. 10850 of the D.C.S. MSS., Vol. XIX.

Complete.

---

(n) शिवभुजङ्गम्.

ŚIVABHUJAṄGAM.

Foll. 86*a*—89*b*.

Similar to the work described under R. No. 610.

This eulogy is said to have been made by Rāvaṇa to please Śiva. The allusion herein is to the Puranic story relating to one of Rāvaṇa's monstrous adventures, viz., his attempt to lift up Mount Kailāsa and the trouble caused thereby.

Complete.

**Beginning:**

जटाकटाहसंभ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनी(नि) ।
धगद्धगद्धगज्ज्वलज्ज्व(ल्ल)लाटपट्टपावके
किशोरचन्द्रशेखरे रति(:)प्रती(ति) क्षणं मम ॥

**End:**

स्तवं महेशितुर्दशास्यसंस्तुतं शुभावहं
पठन्त्यहर्निशं मुदा नरस्तु यः शिवाग्रतः ।

ससाधुतामेरेशभोगमप्यवाप्य श्रीमतः
सुखेन शैवमालयं व्रजेत्सुरेन्द्रवन्दितः ॥

**Colophon:**

इति श्रीमदुत्तररामायणे श्रीकैलासपर्वतोद्धारे श्रीसामगानात् परं रावणविरचितं शिवभुजङ्गं संपूर्णम् ॥

Fol. 90 contains a few eulogistic stanzas on Vighnēśvara and Tripura.

(*o*) ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Foll. 91*a*—113*a*. Fol. 113*b* is left blank.

Same work as that described under R. Nos. 619(*b*) and 9183 of the D.C.S. MSS., Vol. XVII, but with a different colophon which is given below :—

Complete; as found in the Uttarakhaṇḍa of the Brahmāṇḍapurāṇa.

**Colophon:**

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्यसंवादे श्रीललितोपाख्याने श्रीललितासहस्रनामस्तोत्रकथनं नाम त्रिपञ्चाशोऽध्यायः ॥

आदौ पीठिकाश्लोकाः ५३. सहस्रनामश्लोकाः १८३. फलश्रुतिश्लोकाः ९५. आहत्य श्लोकाः ३३१.

श्रीमच्छङ्करानन्दनाथात्मजश्रीमन्महेश्वरानन्दनाथसूनुना श्रीनीलकण्ठानन्दनाथेन स्वहस्तलिखितं श्रीललितासहस्रनामस्तोत्रं संपूर्णम् ॥

---

(*p*) ललितासहस्रनामावलिः.

LALITĀSAHASRANĀMĀVALIḤ.

Foll. 114*a*—122*b*.

Same work as that described under R. No. 185(*a*) *ante*, but without Ṛṣicchandōdēvatā, etc.

Incomplete.

(q) कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 123a—124b.

Same work as that described under No. 8909 of the D.C.S. MSS., Vol. XVII.

Wants the beginning and end.

---

(r) ललितात्रिशतीनामस्तोत्रम्.

LALITĀTRIŚATĪNĀMASTŌTRAM.

Foll. 125a—128a.

Same work as that described under No. 9114 of the D.C.S. MSS., Vol. XVII, but with a different colophon.

Wants the beginning; otherwise complete.

**Colophon:**

इति ब्रह्माण्डपुराणे उत्तरखण्डे (श्रीहयग्रीवागस्त्यसंवादे) (श्रीललितोपा)ख्याने श्रीललितात्रिशती नाम . . . चतुःपञ्चाशोऽध्यायः ॥

आदौ पीठिकाश्लोकं २८. त्रिशतीश्लोकाः ८०. फलश्रुतिश्लोकाः ६. आहत्य श्लोकाः ११४.

श्रीमच्छङ्करानन्दनाथात्मजश्रीमदवधूतमहेश्वरानन्दनाथसूनुश्रीमदवधूतनीलकण्ठानन्दनाथेन लिखितमिदं श्रीललितात्रिशतीनामस्तोत्रं संपूर्णम् ॥

---

(s) ललितात्रिशतीनामावलिः.

LALITĀTRIŚATĪNĀMĀVALIḤ.

Foll. 128b—131b.

Same work as that described under No. 9126 of the D.C.S. MSS., Vol. XVII, wherein this work has been mentioned as Dēvītriśatīnāmāvali.

Complete.

---

(t) ललिताष्टोत्तरशतनामस्तोत्रम्.

LALITĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 132a—133b.

Same work as that described under No. 9176 of the D.C.S MSS., Vol. XVII.

Incomplete.

---

(ध) ललिताष्टोत्तरशतनामावलिः.

LALITĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 134*a*—135*b*.

Same work as that described under No. 9179 of the D.C.S MSS., Vol. XVII, but with the addition of Ṛṣicchandōdēvatā, etc.

Complete.

---

(e) दक्षिणकालिकामन्त्रः.

DAKṢIṆAKĀLIKĀMANTRAḤ.

Foll. 136*a*—137*b*.

Same work as that described under No. 6365 of the D.C.S. MSS., Vol. XIII, but with slight difference in the beginning in Ṛṣi, Chandas and Dēvatā.

Complete.

---

(ज) शिवाम्नायस्तोत्रम्.

ŚIVĀMNĀYASTŌTRAM.

Foll. 138*a*—140*b*.

Similar to the work described under No. 10707 of the D.C.S. MSS., Vol. XIX. The Mantras associated with the Āmnāya-mantras are said to have issued from the several faces of God Śiva.

Complete; wants the beginning.

**Beginning:**

प्रेरकः सूचकश्चैव वाचको दर्शकस्तथा ।
शिक्षको बोधकश्चेति षडेते गुरवस्स्मृताः ॥
शैवे गुरुत्रयं प्रोक्तं वैष्णवे गुरुपञ्चकम् ।
वेदशास्त्रेषु शतशो गुरवश्च कुलान्वये ॥

क्ष कुक्षिः पीठसंस्थं तदुपरि विलसत्सोमसूत्रं सबिन्दु
तन्मध्ये नादसंस्थं प्रणवपरिवृतं बिन्दुनादौ पुनश्च ।
इत्थं सञ्चिन्त्य योगी विविधमनुदिनं तारकं व्योमसंस्थं
सर्वाधारं महेशि(शं)सकृदपि मनसा ध्यायते यस्स मुक्तः ॥
पूर्व(र्वे) दक्षिणपश्चिमोत्तरमधोर्ध्वाख्यं तदानुत्तरं
विश्वोमुन(?) गुरुत्रयं त्रिचरणं वन्दे महद्वासनाम् ।
पञ्चाम्नानवनाथषोडशषडाधारं च षड्दर्शनं
वाग्देव्यष्टषडङ्गपञ्चकरहस्याम्नायरक्तस्तुतौ ॥

**End:**

यः पठेत् प्रातरुत्थाय भक्तियुक्तेन चेतसा ॥
सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमान्वितम् ।
श्रीविद्यालोकमाप्नोति वेदवाक्यानुसारतः ॥

**Colophon:**

इति श्रीशिवाम्नायस्तोत्रं संपूर्णम् ॥

---

(ज) श्रीनाथादिगुरुपरम्परास्तोत्रम्.

ŚRĪNĀTHĀDIGURUPARAMPARĀSTŌTRAM.

Foll. 140*b*—148*b*.

A eulogy on the Śākta teachers of religion, such as, Śrīnātha, etc. Similar to the work described under No. 10886 of the D.C.S MSS., Vol. XIX.

Complete

**Beginning:**

षट्(क्षं)कुक्षिः पीठसंस्थं तदुपरि विलसत्सोमसूत्रं सबिन्दु
तन्मध्ये नादसंस्थं प्रणवपरिवृतं बिन्दुनादौ पुनश्च ।
इत्थं सञ्चिन्त्य योगी विविधमनुदिनं तारकं व्योमसंस्थं
सर्वाधारं महेशं सकृदपि मनसा ध्यायते यस्स मुक्तम्(:) ॥

* * * *

सनकश्च सनन्दश्च सनातन ततः परम् ।
सनत्कुमारो रैवतको दत्तात्रेयस्ततः परम् ॥

* * * *

विश्वानन्दो महात्मा तु चिदानन्दस्ततः परम् ॥
विद्यारण्यो महाकालः कृत्तिकेशस्ततः परम् ।
निर्मलानन्दयोगीन्द्रो महेशानन्दमाश्रये ॥

इति गुरुपारम्पर्यक्रमम्(:) ।

**End:**

वाग्भवानन्दनाथश्रीपादुकां नीलक(क)ण्ठानन्दनाथश्रीसांभ्रमानन्दनाथश्रीचिदाम्बानन्दनाथश्रीप्रसन्नानन्दनाथश्रीआदिनाथानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

**Colophon:**

श्रीनाथादिकृतं सम्पूर्णम् ॥

Foll. 149—150 contain a few lines from Bhagavanmantrabhāga.

---

(y) इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTŌTRAM.

Foll. 151a—152b.

Same work as that described under No. 5998 of the D.C.S. MSS., Vol. XII.

Incomplete.

Fol. 153 contains Āñjanēyamantra. Fol. 154 contains Kṛṣṇāṣṭōttaraśatanāmastōtra (wants beginning and end) and Foll. 155a—161a contain the Viṣṇusahasranāmastōtra (wants beginning and end).

---

## R. No. 1416.

Palm-leaf. 13 × 1⅝ inches. Foll. 47. Lines, 8 in a page. Grantha and Tamil. Good.

Purchased in 1914-15 from M.R.Ry. E. R. Śrīnivāsarāghavācāriyar, Temple Doctor, Rāmēśvaram.

आयुर्दायगणितविधिः.

## ĀYURDĀYAGAṆITAVIDHIḤ.

This work lays down at first the method of finding out the correct time by certain measurements made with reference to the shadow of a person and then gives rules for determining the period of the life time of a person from his horoscope. It is based on an astrological work named Jātakapaddhati.

Complete.

**Beginning :**

जातकपद्धतिमार्गेण आयुर्दायक्रमो(म उ)च्यते—

सूर्योदयादिजन्मान्तं नाड्यादीन् सूक्ष्ममालिखेत् ।
छायां तत्कालजां न्यस्य त्यक्त्वा वाक्यं तदूर्ध्वगम् ॥
तच्छिष्टमङ्गुलीकृत्य षष्ट्या हत्वा विभाजयेत् ।
तत्कालाङ्घ्रिप्रभापार्श्ववाक्ययुग्मान्तराङ्गुलैः ॥
लब्ध्वा विनाडिकाः शोध्याः त्यक्तवाक्यस्य नाडिषु ॥

என்றது—பகலைக்கு அடி அளந்து வைச்ச அடித்தன்னில் மீதமுள்ள அடியிற் அந்த அந்த மாஸத்து வ்யாஸமாயிருப்பவாக்யம் எந்த வாக்யம் எடுபடுமோ அந்த வாக்யத்தை வாங்கி மிகுந்ததை ஒரு அடிக்கி எட்டு அங்குலியாக இரண்டு விரக்கடை ஒரு அங்குலிதம் அங்குலியாக்கவும். அந்த அங்குலியை அறுபதிலே பெருக்கி வைச்சுக்கொள்ளவும்.

**End :**

ஆயுர்தாயகணிதத்தை வருத்திப்பார்த்து எழுதிக்கொள்ளவும்.

ये तु स्वधर्मनिरता विजितेन्द्रियाश्च ये पथ्यभोजनजुषो द्विजदेवभक्ताः ।
ये मानवा दधति ये शुभशीललीलास्तेषामिदं कलितमायुरुदारधीभिः ॥

* * * *

ஆயுர்தாயகணிதப்படியென்னும் ப்ரமாணங்களை நிச்சயித்து ஆயுர்நிர்ணயம் பண்ணவேணுமென்னும் இந்தப்ரோக்த விஷயாயம். அஞ்சாமிடம் த்ரிகோணமென்றும் ஒன்பதாமிடம் த்ரிகோணமென்றும்.

प्रथुविरचितशास्त्रात् गत्यनूक्तादिचिन्त्यं
गुरुरुडुपतिशुक्रावित्यादि வாசகத்தில்
दिनकरशशिवीर्याधिष्ठितत्र्यंशनाथाः
प्रवरसमनिकृष्टास्तुङ्गभागादनूक्ते ॥

என்றது இப்படி வசனம்கொண்டும் இவர் பராசுரர்க்க ளிருவே லூடாக்ராதிகளை உபமாவித்து வந்தவ னென்று தீக்கு பராசுர பாவங்களை விழுதித்து குபாடாக்ரமம் அறிந்துகொள்ளவும்.

**Colophon:**

इति जातकपद्धतिमार्गेण आयुर्दायगणितविधिस्समाप्तः ॥

The scribe adds—

जनो धन्वीति कल्यब्दप्रभवाब्देयदक्षिणे ।
कन्यामासे कृष्णपक्षे दशम्यां स्थिरवासरे ॥
पुनर्वसुच(सु)नक्षत्रे आयुर्दायगुणक्रमम् ।
पुस्तकं लिखितं पूर्णं पुरुषोत्तमहस्तकः (तः) ॥

This manuscript is said to have been written by Vasiṣṭha, son of Nārāyaṇasōmayājin

---

## B. No. 1417.

Palm-leaf. 13¾ × 1½ inches. Foll. 89. Lines, 5 in a page. Grantha. Fair.

Purchased in 1914–15 from M.R.Ry. E. R. Śrīnivāsarāghavācāriyar, Temple Doctor, Rāmēśvaram.

(a) पञ्चाङ्गरुद्रन्यासः (लघु):.

### PAÑCĀṄGARUDRANYĀSAḤ (LAGHUḤ).

Foll. 1a—9a. Fol. 9b is left blank.

Same work as that described under No. 6576 of the D.C.S. MSS., Vol. XIII.

Complete.

---

(b) पञ्चाङ्गरुद्रन्यासः (महान्यासः).

### PAÑCĀṄGARUDRANYĀSAḤ (MAHĀNYĀSAḤ).

Foll. 10a—38a.

Same work as that described under No. 6578 of the D.C.S. MSS., Vol. XIII.

Complete.

Foll. 38*b*—48*b* give the verses used in the Nyāsa ceremony connected with Mahānyāsa. Fol. 49 contains some miscellaneous verses.

---

(*c*) सर्पसूक्तम्.

SARPASŪKTAM.

Foll. 50*a*—52*a*.

Consists of the following verses from the Ṛgvēda:—

I-133-5, VII-104-22, IV-3-14.

Foll. 52*b* to 56*a* contain the verse relating to Mṛttikāsnāna. Fol. 56*b* is left blank.

---

(*d*) महासौरखण्डः.

MAHĀSAURAKHAṆḌAḤ.

Foll. 57*a*—64*b*.

Same work as that described under No. 8026 of the D.C.S. MSS., Vol. XV.

Complete

**End:**

नमः शौनकाय नमः शौनकाय। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति।

* * * *

एकचक्ररथो त(य)स्य दिव्यः कनकभूषितः।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरा(रः)
दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते।
नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चनारायणशङ्करात्मने॥

**Colophon:**

इति महासौरं सम्पूर्णम्॥

(e) बह्वृचरुद्रसूक्तम्.

BAHVṚCARUDRASŪKTAM.

Foll. 65a—71a.

This forms the 43rd Sūkta of the first Maṇḍala of the Ṛgvēda and is in praise of Śiva.

Complete.

Foll. 71a—74a contain certain verses from the Ṛgvēda, each of them ending in the word देवः.

---

(f) आयुःसूक्तम्.

ĀYUSSŪKTAM.

Foll. 74a—76a. Foll. 76a—78a contain certain Vedic verses (with commentary) used in pronouncing blessings. Fol. 78b is left blank.

Consists of certain Vedic verses ending in the word आयुः.

---

(g) पञ्चामृतसूक्तम्.

PAÑCĀMṚTASŪKTAM.

Foll. 79a—81b.

This consists of the following hymns taken chiefly from the Ṛgvēda and the collection is intended to be recited at the time of preparing what is known as Pañcāmṛta, a mixture of milk, curd, ghee, honey and fruit for anointing the image of God.

| Maṇḍala | .. | Sūkta | .. | Ṛk. | Aitarēya Brāhmaṇā |
|---|---|---|---|---|---|
| I | .. | 91 | .. | 16-20 | 8-37-7 and 8 |
| IV | .. | 39 | .. | 6 and 1 | Vajasanēyasaṃhitā. |
| " | .. | 40 | .. | 1 to 5 | 20—3. |
| II | .. | 3 | .. | 11 | Aitarēya Brāhmaṇa |
| I | .. | 90 | .. | 6-8 | 8-7-9. |
| IX | .. | 85 | .. | 6 | |
| X | .. | 120 | .. | 3-6 | |
| " | .. | 97 | .. | 15 | |
| IV | .. | 57 | .. | 6 | |

Complete.

**Beginning:**

आप्यायस्व समेधते विश्वतस्सोमवृष्ण्यं भवा वाजस्य सङ्गथे.

**End:**

बलाय श्रियै यशसेऽन्नाद्याय भूर्भुवस्सुवरोम्। अमृताभिषेकोऽस्तु ।

Foll. 82*a*—85*b* contain the अभिश्रवणमन्त्र and foll. 86*a*—89*b* contain a portion of the Jaiminibhārata.

---

R. No. **1418.**

Purchased in 1914-15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(a) कलिविडम्बनम्.

KALIVIḌAMBANAM.

Foll. 1a—7a.

The author Nīlakaṇṭhadīkṣita herein brings out the influence of Kali on people in the present Yuga.

Complete.

**Beginning:**

न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः ।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥
असंभ्रमो विलज्जत्वमवज्ञा प्रतिवादिनि ।
हासो राज्ञः स्तवश्चेति पञ्चैते जयहेतवः ॥

**End:**

विषेण पुच्छलग्नेन वृश्चिकः प्राणिनामिव ।
कलिना दशमांशेन कालः सर्वोऽपि दारुणः ॥
यत्र भार्यागिरो वेदा यत्र धर्मोऽर्थसाधनः ।
यत्र स्वप्रतिमा मानं तस्मै श्रीकलये नमः ॥
काममस्तु जगत्सर्वं कालस्यास्य वशंवदम् ।
कालकालं प्रपन्नानां कालः किं नः करिष्यति ॥
कविना नीलकण्ठेन कलेरेतद्विडम्बनम् ।
चरितं विदुषां प्रीत्यै राजास्थानानुमोदनम् ॥

**Colophon:**

इति श्रीनिल्कण्ठदीक्षितकृतौ कलिविडम्बनम् ॥

(b) सभारञ्जनम्.

SABHĀRAÑJANAM.

Foll. 7b—13b.

One hundred and four witty stanzas intended to please an assemblage and dealing with various subjects: by Nīlakaṇṭha-dīkṣita.

Complete.

**Beginning:**

षड्दर्शनीपरिज्ञानमण्डितैरिव पण्डितैः ।
स्तम्भैश्चित्रैर्वितानैश्च सभा किमवभासते ॥
सन्तु सर्वविधा मर्त्या न सन्त्वेके विपश्चितः ।
असूर्येणेव लोकेन किन्तेन विषयेण नः ॥

**End:**

पत्न्यां माङ्गल्ययोगेन पत्युरायुः प्रवर्धते ।
प्रकृतीनां तु भाग्येन पार्थिवस्सुखमेधते ॥
चलन्ति सर्वमर्यादाश्चलिते सति पार्थिवे ।
पर्वता अपि कम्पन्ते प्रसक्ते कम्पने भुवः ॥
निर्मितं शतकं सार्धं नीलकण्ठेन यज्वना ।
सभारञ्जनमेतेन साधयन्तु मनीषिणः ॥

**Colophon:**

इति सभारञ्जनं समाप्तम् ॥

---

(c) अन्यापदेशः.

ANYĀPADEŚAḤ.

Foll. 14a—26b.

By Nīlakaṇṭhadīkṣita. Same work as that described under R. No. 609(b) *ante*, wherein see for the beginning.

Complete in one hundred and one stanzas.

**End:**

भूतानां प्रभवस्थितिप्रविलयास्त्वय्येव विश्वम्भरे
त्वद्गर्भे ननु ते रसातलजुषो दैत्याः फणीन्द्राश्च ये ।

त्वं सर्वैरुपजीव्यसे द्विविधैरस्त्वत्तोऽपि किंचित्परं
न स्यात् स्यादपि वा निरस्तविशयं ब्रह्म त्वमेवासि नः ॥

**Colophon:**

इति नीलकण्ठदीक्षितविरचितोऽन्यापदेशः समाप्तः ॥

---

(*d*) शान्तिविलासः.

ŚĀNTIVILĀSAḤ.

Foll. 27*a*—31*a*. Fol. 31*b* is left blank.

Stanzas inculcating contentment and freedom from worldly attachment: by Nīlakaṇṭhadīkṣita.

Complete.

**Beginning:**

वंशे कस्मिंश्चज्जनिषि कयोः पुत्रतामग्रहीषं
कत्यश्रौषं तदपि कथितास्तत्र सद्भ्यः कतिभ्यः ।
किं नाद्राक्षं व्यसनमथवा किं सुखं नान्वभूवं
नोपारंसीस्त(त्त)दपि हृदयं कीदृशो मे विपाकः ॥
पादौ मे स्तः परमचतुरौ कीकटानेव गन्तुं
वागप्यास्ते निभृतमनृतान्येव वक्तुं वचांसि ।
मीमांसन्ते मम च मतयो दोषदृष्टौ परेषां
पङ्गुर्मूकः पशुरपि भवाम्यात्मनीने तु कृत्ये ॥

**End:**

आगर्भादाकुलपरिवृढादाचतुर्वक्त्रतोऽपि
त्वत्पादाब्जप्रपदनपरान् वेत्सि नश्चन्द्रमौले ।
मायावाश्च प्रपदनपरेष्वप्रवृत्तिं स्वमात्थ
स्वामिन्नेवं सति यदुचितं त(त्र त)त्र प्रमाणम् ॥
दण्डं धत्ते सकलजगतां दक्षिणे यः कृतान्तो
नामाप्यस्य प्रतिभयतनोर्नापगृह्णीमहीति ।

प्रा(?)क्षास्मस्तन्निगमवचसामुत्तरो यः कृतान्तो
यद्वा तद्वा भवतु न वयं तस्य पश्येम वक्त्रम् ॥

**Colophon :**

इति श्रीशान्तिविलासस्सम्पूर्णः ॥

---

(८) वैराग्यशतकम्.
VAIRĀGYAŚATAKAM.

Foll. 32*a*—38*b*.

By Nīlakaṇṭhadīkṣita. A centum of stanzas inculcating renunciation.

Complete.

**Beginning :**

आस्ते[स्त] कश्चन भिक्षुः सङ्क्षिप्ताव्ययानि दश ।
न ममेत्यव्ययुगलं याचामस्तं किमस्त्यन्यत् ॥
धीसचिवः स्थैर्यबलं सङ्कल्पविरोधिशान्तिधनम् ।
विश्वत्रयविषयमिदं वैराग्यं नाम साम्राज्यम् ॥

**End :**

न गृहीतं श्रुतिहृदयं न च निगृहीतं परिप्लवं हृदयम् ।
इच्छामि च धाम परं गच्छामि तु विश्वनाथपुरम् ॥
मार्घ्वं कीकटदेशे कपि(वि)षु न रामानुजायध्वम् ।
आश्रयत राजधानीं काशीमाशीविषाङ्कस्य ॥

**Colophon :**

इति श्रीनीलकण्ठदीक्षितेन विरचितं वैराग्यशतकं संपूर्णम् ॥

Fol. 39 contains a few lines from Brahmayajña and Devarṣitarpaṇa.

R. No. **1429.**

Śrītāla. 11×1¾ inches. Foll. 193. Lines, 12 in a page. **Grantha.** Good.

Purchased in 1914-15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) दक्षिणामूर्त्यष्टकम्.

DAKṢIṆĀMŪRTYAṢṬAKAM.

Fol. 1.

Same work as that described under R. No. 118(*b*) *ante*.

Complete.

---

(*b*) नामद्वादशपञ्जरम्.

NĀMADVĀDAŚAPAÑJARAM.

Fol. 2*a*.

Same work as that described under No. 6473 of the D.C.S. MSS., Vol. XIII.

Complete.

---

(*c*) ब्रह्मसूत्राणि.

BRAHMASŪTRĀṆI.

Foll. 2*a*—9*b*.

Same work as that described under No. 4649 of the D.C.S MSS., Vol. IX.

Complete.

---

(*d*) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 10*a*—35*b*.

Same work as that described under No. 1992 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

(e) भागवतमाहात्म्यम् (स्कान्द).

BHĀGAVATAMĀHĀTMYAM (SKĀNDA).

Foll. 36a—124b.

Same work as that described under No. 2490 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

---

(f) हरिभक्तिसुधोदयम्.

HARIBHAKTISUDHŌDAYAM.

Foll. 125a—177b.

Nārada is herein stated to have related to the sages of Naimiśāraṇya what he learnt from Kapila and what he inculcated in a previous composition of his own about devotion to God Viṣṇu. The greatness of Viṣṇu and of unswerving devotion to Him as also the results of such devotion and the manner of making contemplation in its various stages of Śravaṇa, Manana and Nididhyāsana, are explained and illustrated by narrating the stories of Dhruva and Prahlāda.

Complete in twenty Adhyāyas.

**Beginning:**

एकं यज्जनयत्यनेकतनुभृत्तस्यान्यजस्रं मिथो
भिन्नाकारगुणानि कैश्चिदपि वा नोप्तं न सिक्तं जलैः ।
कालेनापि न जीर्यते हुतभुजा नो दह्यते छिद्यते
नाद्रिस्तत्सकलस्य बीजमनिशं ब्रह्माभिधं धीमहि ॥
यत्पादाब्जयुगं सुगन्धि तुलसीलोभाद्धजन्तोऽप्यहो
योगिप्रार्थ्यगतिं प्रयान्ति मधुपा यद्भक्तिहीनास्त्वधः ।
अब्भक्षाः पवनाशिनोऽपि मुनयस्संसारचक्रे भृशं
भ्राम्यन्त्येव गतागतैरिह मुहुस्तस्मै नमो विष्णवे ॥

* * * *

अस्ति त्रैलोक्यविख्यातं वनं नैमिशसंज्ञितम् ।
पवित्रं गोमतीतीरे नित्यपुष्पफलर्द्धिमत् ॥

स्वलङ्कृता महात्मानः श्रीभागवतलक्षणैः ।
ऋषयो यत्र सत्रेण चिरं हरिमपूजयन् ॥

* * * *

इत्थं संप्रार्थितः सौम्यैः द्विजैरकलिकङ्कणैः ।
ओमित्युवाच हृष्टात्मा स वैष्णवजनप्रियः ॥

**End:**

स इत्थं विष्णुगाथाभिर्नन्दयित्वा द्विजोत्तमान् ।
शौनकादीन् नैमिशीयान् ब्रह्मसूनुस्तिरोदधे ॥
य इमं शृणुयाद्भक्त्या हरिभक्तिसुधोदयम् ।
कथयेद्वा स पापौघान्मुक्तो मोक्षं च गच्छति ॥

**Colophon:**

इति श्रीहरिभक्तिसुधोदये विंशोऽध्यायः ॥

---

(७) पाण्डुरङ्गमाहात्म्यम्.

PĀṆḌURAṄGAMĀHĀTMYAM.

Foll. 178*a*—193*b*.

On the holiness and religious importance of the sacred shrine at Pandrapur, wherein God Viṣṇu is worshipped under the name, Viṭṭhala. It is said to have been narrated by Mārkaṇḍēya to King Ambarīṣa

Complete; said to form the seventh Adhyāya of the Brahmāṇḍapurāṇa.

**Beginning:**

समचरणसरोजं सान्द्रनीलाम्बुदाभं
जघननिहितपाणिं मण्डनं मण्डनानाम् ।
तरुणतुलसिमालाकन्धरं कञ्जनेत्रं
सदयधवलहासं विट्ठलं चिन्तयामि ॥

अम्बरीष उवाच—

कथितानि त्वया ब्रह्मन् क्षेत्राणि सुमहान्त्यपि ।
धरण्यां मुनिशार्दूल भुक्तिमुक्तिप्रदान्युत ॥

विष्णुभक्तिकराण्येव क्षेत्राण्यत्यद्भुतानि च ।
सालग्रामं गयाक्षेत्रं नैमिशं पुण्यवर्धनम् ॥

* * * *

माहात्म्यं पाण्डुरङ्गाख्यक्षेत्रस्य सुमहत्तरम् ।
तस्मिन् देवो जगन्नाथः शङ्खचक्रगदाधरः ॥
भक्ताय विप्रपुत्राय प्रादाद्वरमनुत्तमम् ।
देवर्षिपितृगन्धर्वगरुडोरगसेवितः ॥
कटिन्यस्तकरः श्रीशः शङ्खपाणिर्जनार्दनः ।
भक्तानुकम्पी भगवानास्ते तत्रातिसुन्दरः ॥

* * * *

वक्तुमर्हस्यशेषेण तस्य क्षेत्रस्य वैभवम् ।
यथा स भगवान् देवः प्रवसन्निष्टकोपरि ॥
ननर्त देवगन्धर्वैः स्तूयमानस्सतां गतिः ।
इष्टकायां नटन्यस्माद्विट्ठलः कथ्यते भुवि ॥

मार्कण्डेयः—

साधु साधु महाप्राज्ञ राजपुत्र महायशाः ।
धन्योऽसि त्वं महाभाग यद्गोविन्दकथारुचिः ॥
तत्तेऽहं संप्रवक्ष्यामि तस्य क्षेत्रस्य वैभवम् ।
पाण्डुरङ्गमिति ख्यातं पुण्यं त्रैलोक्यविश्रुतम् ॥

* * * *

निजभक्तकरक्षिप्तामिष्टकां स्वयमीक्ष्य तु ।
पद्मासनमाक्रम्य ननर्ताद्भुतदर्शनः ॥
यदिष्टकां समारुह्य कटिन्यस्तकरद्वयः ।
ननर्त तस्माद्राजेन्द्र नाम्ना तं विट्ठलं विदुः ॥
तदा देवर्षिगन्धर्वाः किन्नराश्चाप्सरोगणैः ।
तुष्टुवुर्हृष्टरोमाणस्तत्राभूत् रङ्ग अद्भुतः ॥

वेणुनादं भगवतस्सर्वलोकैकमोहनम् ।
श्रुत्वा दूरगता गावो धावमानास्तमन्वयुः ॥
विक्षिपन्त्यस्स्वपुच्छानि प्रेम्णा राजीवलोचने ।
गोखुरैरर्च्यमानायां भूम्यां रेणुरभून्नृप ॥
तेन पाण्डुरमूद्रङ्गस्तत्र देवगणैर्युतः ।
पाण्डुरङ्ग इति ख्यातं क्षेत्रं पापप्रणाशनम् ॥

**End:**

इति ते सर्वमाख्यातं पाण्डुरङ्गस्य वैभवम् ।
विट्ठलस्य च राजेन्द्र भीमरथ्यास्तथैव च ॥

सूतः—

इत्यम्बरीषाय मुनिर्महात्मा मृकण्डुसूनुः परमार्थमुक्त्वा ।
संपूजितस्तेन महात्मना पुनर्जगाम विप्रस्तपसे यथागतम् ॥
य इदमनुशृणोति श्रावयेद्वा मुरारेः
चरितममलकीर्तेः पाण्डुरङ्गेश्वरस्य ।
अनुदिनमखिलार्थान् प्राप्य निर्मुक्तबन्धः
स भवति हि मुरारेः प्रीतिपीयूषपात्रम् ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे श्रीमत्पाण्डुरङ्गमाहात्म्ये सप्तमोऽध्यायः ॥

---

R. No. 1430.

Palm-leaf. 15 × 1¼ inches. Foll. 40. Lines, 8 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

**भगवन्नाममहिमा.**

BHAGAVANNĀMAMAHIMĀ.

Similar to the work described under R. No. 25 *ante*. Taken from various Purāṇas and Tantras.

Complete.

**Beginning :**

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति ।

* * * *

भगवान्—

सत्यं ब्रवीमि मनुजाः स्वयमूर्ध्वबाहुः
यो मां मुकुन्द नरसिंह जनार्दनेति ।
जीवन् जपत्यनुदिनं मरणे ऋणीव
पाषाणकाष्ठसदृशाय ददाम्यभीष्टम् ॥
ऋणमेतत् प्रवृद्धं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णा मां दूरवासिनम् ॥

* * * *

ब्रह्मसंहितायां बोधायनं प्रति कृष्णः—

मन्नामकीर्तनफलं विविधं निशम्य
न श्रद्दधाति मनुजो यदुतार्थवादम् ।
यो मानुषस्तमिह दुःखचये क्षिपामि
संसारघोरविविधार्तिनिपीडिताङ्गम् ॥

* * * *

यस्याङ्गे जलदद्युतिः कटितटे सौवर्णवर्णा पटी
नेत्रे फुल्लसरोरुहप्रतिमता वक्त्रे शशाङ्काकृतिः ।
कण्ठे कौस्तुभकान्तिरुज्ज्वलतमा वक्षःस्थले चोत्तमा
काप्यम्भोजमुखी पदे सुरसरित्कस्मैचिदस्मै नमः ॥

**End :**

यस्यायुतायुतांशेन विश्वभक्तिरियं स्थिता ।
अविच्छिन्नस्वरूपं तं प्रणमामि सदाऽमलम् ॥

इति विष्णुपुराणवचनेन चायमर्थो दर्शितः । निर्विशेषं परं ब्रह्म अयुतांशं कृत्वा तत्रैकांशमादाय पुनश्चायुतताकरणे दशकोट्यंशा भवन्ति। परब्रह्मणो दशकोट्यंशानां मध्यगतैकस्मिन्नंशे मायाशक्तिः कृत्स्नापि तिष्ठति । तन्मायाविशिष्टपरब्रह्मैवेश्वरस्ततस्तदीश्वरापेक्षा परब्रह्मापेक्षैवेति-सिद्धम् ॥

Fol. 37*b* is left blank. Foll. 38—40*a* contain some witty stanzas. Fol. 40*b* is left blank.

---

R. No. **1431.**

Palm-leaf. 17 × 1¼ inches. Foll. 58. Lines, 4 in a page. Nandināgarī. Fair.

Purchased in 1914–15 from M.R.Ry. Lakṣminṛsimhacārya of Rāmēśvaram.

(*a*) प्रातस्स्मरणीयस्तोत्रम्.

PRĀTASSMARAṆĪYASTOTRAM.

Foll. 1*a*—2*a*.

Same work as that described under No. 10162 of the D.C.S. MSS., Vol. XVIII, but with slight difference in the beginning and end and with the addition of the stanzas given below. In the last stanza the authorship of the work is attributed to Vādirāja.

Complete; in three stanzas.

**Beginning:**

कराग्रे वसते लक्ष्मीः करमूले सरस्वती ।
करमध्ये तु गोविन्दः प्रभाते करदर्शनम् ॥

माता च कमला देवी पिता देवो जनार्दनः ।
बान्धवा विष्णुभक्ताश्च स्वदेशं भुवनत्रयम् ॥
सुदिनं सुप्रभातम् ।

उत्तिष्ठोत्तिष्ठ गोविन्द ( . . . ) त्रैलोक्यं मङ्गलं कुरु ॥

* * * *

प्रातस्स्मरामि वरकुण्डलशोभिगण्ड . . . रमेशम् ॥

**End:**

वादिराजयतिप्रोक्तं श्लोकत्रयमिदं शुभम् ।

प्रातःकाले पठेन्नित्यं पापेभ्यः प्रतिमुच्यते ॥

---

(b) सुप्रभातपञ्चकम्.

SUPRABHĀTAPAÑCAKAM.

Fol. 2.

Five stanzas addressed to the different incarnations of God Viṣṇu and intended to be repeated in the early morning, such repetition being believed to enable one to secure welfare and prosperity; by Lakṣmīvallabhabhikṣu, a disciple of Vādirājārya.

Complete.

**Beginning:**

श्रीमत्स्यकूर्मास्य(स्य)वराहदेवनृकेसरी(रिन्) वामन जामदग्न्य ।

श्रीरामकृष्णावथ बुद्धकल्की कुर्वन्तु सर्वे मम सुप्रभातम् ॥

श्रीकृष्ण नारायण वासुदेव मुकुन्द कृष्णाच्युत माधवेति ।

सङ्कीर्तनाद्भुतकृतप्रसङ्गाः कुर्वन्तु सर्वे मम सुप्रभातम् ॥

**End:**

इति प्रभातपञ्चकं प्रतिप्रभातमादरात्

स्तुतिं पठन्ति ये नरा गतिं व्रजन्ति ते शुभाम् ॥

वादिराजार्यशिष्येण लक्ष्मीवल्लभभिक्षुणा ।

प्रभातपञ्चकं स्तोत्रं कृतं कृष्णस्य तुष्टये ॥

Foll. 3a and 4a contain a few stanzas from Tulasīstōtra.

---

(c) दधिवामनस्तोत्रम्.

DADHIVĀMANASTOTRAM.

Foll. 4a—6a.

Same work as that described under No. 9996 of the D.C.S. MSS., Vol. XVIII. Said to be taken from the Vāmanapurāṇa.

Complete

---

(*d*) नारायणनामाष्टकम्.

NĀRĀYAṆANĀMĀṢṬAKAM.

Fol. 6*a*.

Gives eight names of God Viṣṇu, *i.e.*, Nārāyaṇa, and explains the advantages of their repetition daily.

Complete.

**Beginning :**

अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनम् ।
हंसं नारायणं चैव एतन्नामाष्टकं शुभम् ॥

**End :**

गङ्गायां मरणं चैव दृढा(भ)क्तिस्तु केशवे ।
ब्रह्मविद्याप्रबोधस्स्यात्तस्मान्नित्यं पठेन्नरः ॥

---

(*e*) नारायणाष्टोत्तरशतनामस्तोत्रम्.

NĀRĀYAṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 6*b*—9*a*. Fol. 9*b* is left blank.

Same work as that described under No. 8935 of the D.C.S. MSS., Vol. XVII, but with a few additional stanzas in the beginning and end and with a slightly different colophon.

Complete.

---

(*f*) शिवस्तुतिः.

ŚIVASTUTIḤ.

Foll. 10*a*—13*b*.

A devotional eulogy on God Śiva.

Complete.

**Beginning:**

स्फुरत्स्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदा नु शितिकण्ठ ते वपुरवेक्षते वीक्षणम् ॥
त्रिलोचन विलोचने लसदि(ति)ते ललामाय(यि)ते
स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् ।
स्वभक्तलतया वशीकृतवती सतीयं सती
स्वभक्तवशगो भवानपि वशी प्रसीद प्रभो ॥

**End:**

अकृशं कुचयोः कृशं वलग्ने
विपुलं चक्षुषि आय(विस्तृ)तं नितम्बे ।
अरुणाधरमाविरस्तु चित्ते
करुणाशालिकपालिभागधेयम् ॥

**Colophon:**

शिवस्तुतिस्समाप्ता ॥

---

(*g*) इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTOTRAM.

Foll. 14*a*—15*a*. Fol. 15*b* is left blank.

Same work as that described under No. 10713 of the D.C.S. MSS., Vol. XIX, but with a different end as given below.

Complete.

**End:**

शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ।
आवर्त(य)न् सहस्रं तु लभते वाञ्छितं फलम् ॥
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

**Colophon:**

इन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥

(h) नवग्रहस्तोत्रम्.

NAVAGRAHASTÔTRAM.

Foll. 16a—17a.

Same work as that described under No. 9535 of the D.C.S. MSS., Vol. XVIII, but the stanzas found herein are in a different order.

Complete.

Fol. 17b contains a few stanzas on the holiness of Sêtu.

---

(i) नृसिंहगुर्वष्टकम्.

NṚSIṀHAGURVAṢṬAKAM.

Fol. 8.

Eight stanzas in praise of one Nṛsiṁhaguru, a follower of Dvaita-Vêdânta: by Ananta, son of Nṛsiṁhâcârya.

Complete.

**Beginning:**

सत्सुधादि सकलं सुजनेभ्यो वर्णयन्तमिह विंशतिवारम् ।
श्रीनृसिंहगुरुराजमहं तं मध्वदासमखिलानतमीडे ॥

**End:**

वासुदेवकरुणाधिकपात्रं नन्दिताखिलजनैर्भजनीयम् ।
श्री(नृसिंह . . . मध्वदासमखिलानतमीडे) ॥
नृसिंहाचार्यवर्याणामनन्ताख्येन सूनुना ।
कृतं गुर्वष्टकं भक्त्या पठतः प्रीयते हरिः ॥

Foll. 19a—24b contain a few Smṛtivacanas on Snânâṅga-tarpaṇa, Puṇdra, Bhagavannirmâlya, etc., and also Puṇyapuruṣa-viṣayastôtras.

---

(j) मङ्गलाष्टकम्.

MAṄGALÂṢṬAKAM.

Foll. 25a—27a.

By Vâdirâja. Similar to the work described under No. 11331 of the D.C.S MSS., Vol. XIX.

Complete.

**Beginning:**

शिवतनयवरिष्ठं सर्वकल्याणमूर्ति
परशुकमलहस्तं शोभितं मोदकेन ।
अरुणकुसुममालाव्याललम्बोदरं तं
मम हृदि(दय)निवासं श्रीगणेशं नमामि ॥
लक्ष्मीर्यस्य परिग्रहः कमलभूस्सूनुर्गरुत्मान्रथः
पौत्रश्चन्द्रविभूषणस्सुरगुरुश्शेषश्च शय्या पुनः ।
ब्रह्माण्डं वरमन्दिरं सुरगणा यस्य प्रभोस्सेवकाः
स त्रैलोक्यकुटुम्बपालनपरः कुर्वन्तु(र्यात्तु) मे मङ्गलम् ॥

**End:**

इत्येतद्वरमङ्गलाष्टकमिदं श्रीवादिराजेश्वरे-
डचा(रा)ख्यातं जगतामभीष्टफलदं सर्वाशुभध्वंसनम् ।
माङ्गल्यादिशुभक्रियासु सततं सन्ध्यास्सदा(सु वा) यः पठे-
द्धर्मार्थादिसमस्तवाञ्छितफलं प्राप्नोत्यसौ मानवः ॥

**Colophon:**

इति श्रीवादिराजकृतमङ्गलाष्टकस्तोत्रं सम्पूर्णम् ॥

Fol. 27 contains a few stanzas of Rāmāyaṇasāra, Bhāratasāra and Bhāgavatasāra.

---

(*k*) सदाचारस्मृतिः.

SADĀCĀRASMṚTIḤ.

Foll. 28*a*—31*b*.

By Ānandatīrtha. Same work as that described under **No. 2770** of the D.C.S. MSS., Vol. V.

Complete.

---

(*l*) वायुस्तुतिः.

VĀYUSTUTIḤ.

**Foll. 32*a*—44*a*. Fol. 44*b* is left blank.**

By Trivikramapaṇḍita, son of Subrahmaṇyasūri and disciple of Keśavānandatīrtha. Same work as that described under No. 9810 of the D.C.S. MSS, Vol. XVIII, but with a slight difference in the end and with additional stanzas and colophon as given below.

Complete.

**End:**

सुब्रह्मण्याख्यसूरेस्सुत इति सुभृशं केशवानन्दतीर्थ-
श्रीमत्पादाब्जभक्तः श्रु(स्तु)तिमकृत हरेर्वायुदेवस्य चास्य ।
तत्पादार्चादरेण ग्रथितपदलसन्मालया स्वेतया ये
संराध्यामू नमन्ति प्रति(नि)तमतिगुणा मुक्तिमेते व्रजन्ति ॥
वायुर्भीमो भीमनादो महौजास्सर्वेषां च प्राणिनां प्राणभूतः ।
अनावृत्तिर्देहिनां देहपाते तस्माद्वायुर्देवदेवो विशिष्टः ॥

* * * *

यस्सर्वगुणसम्पूर्णस्सर्वदोषविवर्जितः ।
प्रीयतां प्रीतये चालं विष्णुर्मे परमः सुहृत् ॥
पान्त्वस्मान् (. .) इति ब्रह्मेशसाक्षात्कराः ॥

**Colophon:**

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यविरचिता हरि-वायुस्तुतिः समाप्ता ॥

---

(m) देवतार्चनविधिः.

DEVATĀRCANAVIDHIḤ.

Foll. 45*a*—53*b*.

Same work as that described under No. 8635 of the D.C.S. MSS., Vol. XVI.

Complete.

---

(n) तृचकल्पः.

TṚCAKALPAḤ.

Foll. 54*a*—58*b*. Fol 56*b* is left blank.

Similar to the work described under No. 7850 of the D.C.S. MSS., Vol. XV.

Wants beginning and almost complete in the end.

**Beginning:**

उदु त्यं जातवेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व ऋषिः, सूर्यो देवता, नवाद्या गायत्री ।

* * * *

सूर्यो देवीमुषसं रोचमानामर्योमयो यामभ्येति पश्चात् ॥

**End:**

चित्रं देवानामुदगादनीकमिति षडर्चस्य सूक्तस्य आङ्गिरसपुत्रः कुत्स ऋषिः सूर्यो देवता, सूर्योपस्थाने विनियोगः ॥

---

R. No. **1432.**

Palm-leaf. 15¾ × 1½ inches. Foll. 51. Lines, 6 in a page. Nandināgarī. Fair.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

(*a*) तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Foll. 1*a*—24*b*.

By Annambhaṭṭa. Same work as that described under No. 4154 of the D.C.S. MSS., Vol. VIII.

Complete.

Fol. 25*a* contains a few lines of Śrāddhīyavacana, etc. Fol. 25*b* is left blank. Fol. 26*a* contains the entry: ओङ्कारवादार्थप्रकारः श्रीविजयीन्द्रस्वामिभिः रचितः श्री. Fol. 26*b* is left blank.

---

(*b*) तत्त्वप्रकाशिकाव्याख्या.

TATTVAPRAKĀŚIKĀVYĀKHYĀ.

Foll. 27*a*—47*a*. Fol. 47*b* is left blank.

A commentary on Jayatīrtha's Tattvaprakāśikā, which work has been described under No. 4813 of the D.C.S. MSS., Vol. X.

The name of the author is not known, but he speaks of the existence of other commentaries on the work.

Incomplete.

**Beginning:**

रामं सर्वगुणैः पूर्णं निर्दोषं साधुसेवितम् ।
मुक्तिदं जानकीकान्तं प्रणमामि निरन्तरम् ॥
ज्ञानभा हृत्तमोहर्ता श्रुतिपङ्कजमोदकः ।
व्यासांशुमान् दर्शयतु सन्मार्गं गुरुमण्डलः ॥
वादज्योत्स्ना [ध्व]स्तहृद्ध्वान्तविबुधाभ्यर्थिसाधकम् ।
शुद्धाववोधकं सेवे नित्यं मध्वविधुं विदे ॥
मध्वसिद्धान्तमामथ्य शुद्धधीमन्दराद्रिणा ।
लब्धा न्यायसुधा येन तं जयेन्द्रमहं भजे ॥
दुर्वादिगजसिंहांस्तान्सर्वशास्त्रार्थकोविदान् ।
व्यासराट्प्रमुखान् पूर्वटीकाकर्तॄन् नमाम्यहम् ॥
दुर्मार्गादुद्धृतो यैश्च सन्मार्गे संप्रवेशितः ।
तान् गुरून् सततं सेवे सर्वशास्त्रविशारदान् ॥
अथैतत्कृपया ब्रह्मसूत्रभाष्यप्रकाशिकाम् ।
व्याकरिष्ये यथाबोधं वाक्शुद्ध्यै नाभिमानतः ॥
पूर्वाचार्यकृतास्सन्ति व्याख्या विद्वन्मनोहराः ।
मन्दबोधाय तत्रोक्तसंग्रहायाप्ययं मम ॥

इह खलु तापत्रयपरिशुष्यत्सत्कुमुदमोदकरी मध्वदुग्धाब्धिसम्भूतभाष्येन्दूदितका^मु^दी परतत्त्वप्रकाशिकां कर्तुकामो जयतीर्थमुनिः प्रारिप्सितविघ्नपरिसमाप्त्यादिप्रयोजनकशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकेष्टदेवतास्तुतिरूपमङ्गलं कृत्वा शिष्यशिक्षार्थे ग्रन्थादावुपनिबध्नाति—शुद्धेति ।

अस्मद्युत्तम इति सूत्रेण अस्मच्छब्द एव उपपदत्वेन श्रूयमाणो न श्रूयमाणो वा तदर्थविवक्षायामुत्तमपुरुषो भवतीत्युक्त्या उत्तमपुरुषस्या-

स्वच्छब्दाविनाभूतत्वात् अहमिति कर्ता लभ्यते। तथा चाहं ब्रह्म अलं वन्दे इत्यन्वयः। इदं पद्यं भाष्यावपद्यव्याख्यानरूपम्। तथाहि—

अस्याध्यायार्थतयोक्ते गुणैस्सर्वैरुदीर्णमित्यत्र गुणपदं किं तार्किकरीत्या दुःखादिपरं वेदान्तरीत्या सत्त्वादिपरं वा? नाद्यः।

**End:**

यथोक्तं सुधायां सङ्गतिर्द्विविधा—

अन्तर्भावलक्षणा, आनन्तर्यलक्षणा च। आद्यापि शास्त्राध्यायपादान्तर्भावभेदेन त्रिविधा। द्वितीयाप्याक्षेपिकी, आतिदेशिकी, औपोद्घातिकी आपवादकीत्याद्यनेकविधा इति.

---

(c) प्रणवदर्पणखण्डनम्.

PRAṆAVADARPAṆAKHAṆḌANAM.

Foll. 48a—54a. Fol. 54b is left blank.

In the colophon given below the author is apparently stated to be Vidyādhīśa though it is generally attributed to Vijayīndratīrtha. Same work as that described under No. 4798 of the D.C.S. MSS., Vol. X.

This is also called Oṅkāravicāra.

Complete.

**Colophon:**

इति श्रीविद्याधीश[श्री]श्रीपादचूडामणिकृतोङ्कारविचारस्सम्पूर्णः ॥

---

R. No. **1433.**

Palm-leaf. 18¾ × 1⅜ inches. Foll. 146. Lines, 8 in a page. Nandināgarī. Good.

Purchased in 1914-15 from M.R.Ry. Lakṣminarasiṁhācārya of Rāmēśvaram.

## भारततात्पर्यनिर्णयटीका—प्रमेयमणिमाला.

## BHĀRATATĀTPARYANIRṆAYAṬĪKĀ : PRAMĒYA-MAṆIMĀLĀ.

A commentary on Ānandatīrtha's Mahābhāratatātparyanirṇaya : by Śrīnivāsa, disciple of Mahīdhrācārya, who was the son of Viṭṭhalācārya. This Viṭṭhalācārya is stated (in the penultimate stanza in the extract) to have been a disciple of Nṛsimhārya's disciple Nārāyaṇārya.

Breaks off in the 22nd Adhyāya.

**Beginning :**

श्रीमदानन्दतीर्थार्यहृदयाम्बुजवासिनम् ।
रमाबाहुलताश्लिष्टं नारायणमहं भजे ॥
श्रीमदानन्दतीर्थार्यशास्त्राम्भोधिं विमथ्य यः ।
उद्दधार सुधां वन्दे तमहं जययोगिनम् ॥
श्रीमदानन्दतीर्थार्यकृतशास्त्रपयोनिधिम् ।
यो विमथ्य ददौ ज्ञानसुधां तं गुरुमाश्रये ॥
श्रीविठ्ठलार्यतनुज(श्रीमहीध्रार्यसन्मणेः) ।
स्मृत्वा पदाब्जे व्याकुर्वे महाभारतनिर्णयम् ॥

परमानन्दाख्यात्मकस्य परमात्मनः प्रतिबिम्बतया स्वतश्चिदानन्दाख्यात्मकस्य जीवस्याविद्याकामकर्मनिमित्तबन्धध्वंसाय निखिलजडाजडात्मकात् प्रपञ्चा . . . . . . . खिलगुणगणात्मकतया निरस्तसमस्तदोषतया च परमपुरुषमेव गमयितुं सकलसदागमानां वृत्तिः ।

* * * *

भगवानानन्दतीर्थमुनिः सज्जनानुकम्पया सकलसदागमानां निर्णयं भारतस्य सर्वोत्तमत्वेन विशिष्य तदनुसारेण करिष्यन् विलीनप्रकृतितया अन्तरायविधुरोऽपि शिष्यान् शिक्षयन् स्तुतिरूपमङ्गलमाचरति—नारायणेति । नारायणाय ते नम इति सम्बन्धः ।

* * * *

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमन्महाभारततात्पर्यनिर्णयस्य टीकायां विट्ठलाचार्यतनुजश्रीमहीश्राचार्यचरणसेविना श्रीनिवासेन विरचितायां प्रमेयमणिमालायां प्रथमोऽध्यायः ॥

**End:**

अरक्ताः भगवत्समर्पणेन सात्त्विकाः ।

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमन्महाभारततात्पर्यनिर्णयस्य टीकायां प्रमेयमणिमालायामेकविंशोऽध्यायः ॥

ततः कुरुक्षेत्रमिति । धृतराष्ट्रादिमरणानन्तरमित्यर्थः ।

स्वकुलं सञ्जिहीर्षुस्सन् विप्रशापमजीजनदिति ।

* * * *

श्रीमध्वदासमखिलानतपादपद्मं
व्याख्याप्रभाप्रकटितामलतत्त्वसङ्घम् ।
श्रीमन्नृसिंहवरनामिनमाश्रयेऽहं
सन्मानसाम्बुजदिवाकरमव्ययकान्तिम् ॥
श्रीमन्नृसिंहार्यमुखेन्दुबिम्बात्स्ववस्तुतत्त्वामृतपानतृप्तात् ।
नारायणार्याद्यदवाप विद्यास्तं विट्ठलार्यं च भजे परं गुरुम् ॥
श्रीमदानन्दतीर्थार्यशास्त्राम्भोधिं विमथ्य यः ।
सत्तत्त्वर . . . . . . ॥

---

## R. No. 1434.

Palm-leaf. 17 × 1⅜ inches. Foll. 159. Lines, 5 in a page. Nandināgari. Good.

Purchased in 1914–15 from M.R.Ry. Lakṣminarasimhacārya of Rāmēśvaram.

(a) वायुस्तुतिव्याख्यानम्—कविकर्णामृतम्.

**VĀYUSTUTIVYĀKHYĀNAM: KAVIKARṆĀMṚTAM.**

Foll. 1a—41a. Fol. 41b contains some stanzas of Madhvācāryastuti.

A commentary on the Vāyustuti of Trivikramapaṇḍitācārya, which work has been described under No. 9810 of the D.C.S. MSS., Vol. XVIII: by Kavidarpana Vēdāṅgamaṇi. This is also called Kavikarṇāmṛta.

Complete.

**Beginning:**

श्रीमदानन्दतीर्थभगवत्पादाचार्यैः वायुस्तुतौ प्रवृत्तानां सज्जनानां मोक्षाद्यखिलपुरुषार्थप्रदानाय स्वाभीष्टदेवताभूतश्रीनृसिंहनखरान् प्रार्थयते—पान्त्विति। पुरुहूतः देवेन्द्रः पुरुहूतः पुरन्दर इत्यमरः। तस्य वैरिणो हिरण्यकशिपुप्रभृतयो दैत्याः त एव बलवन्मातङ्गमाः।

* * * *

अस्मान् पान्त्विति योजना। श्रीमदानन्दतीर्थभगवच्चरणानां शिष्येण त्रिविक्रमपण्डिताचार्येण विरचिते(त)स्तुत्या प्रसन्नो भगवानानन्दतीर्थमुनिः वायुस्तुतेर्मन्त्रसिद्ध्यर्थं सम्पुटाकारतयाद्यावन्ते च पठनार्थं नरसिंहनखरान् स्तौति—पान्त्विति। श्रीमांश्चासौ कण्ठीरवास्यश्च सिंहमुखः नरसिंह इति पदात्(यावत्)। तस्य प्रतताः प्रसिद्धा इति वा।

**End:**

सम्प्रति भगवान् स्तोत्रकर्ता त्रिविक्रमाचार्यः स्तोत्रमुपसंहरन् स्वाभिजात्यप्रख्यापनायात्मीयप्रसिद्धकुलदेवताचार्यजनकानां नामाभिधानपूर्वकमेतत्स्तोत्रपाठकानां फलमभिदत्ते—सुब्रह्मण्येति। सुब्रह्मण्याख्यसूरेः सुब्रह्मण्यविपश्चितः।

* * * *

अमू केशवानन्दतीर्थौ संराध्य सम्पूज्य नमन्ति नमस्कारं कुर्वन्ति। एते जनाः प्रततमतिगुणाः अतिविततापरोक्षज्ञानगुणास्सन्तः मुक्तिं मोक्षं व्रजन्ति प्राप्नुवन्ति॥

**Colophon :**

कविकर्णामृतं नाम्ना वेदाङ्गमुनिना कृतम् ।
व्याख्यानं वर्ततामेतदासुधांशुदिवाकरम् ॥

---

(b) वायुस्तुतिः—सव्याख्या.

VAYUSTUTIH WITH COMMENTARY.

Foll. 42a—46b.

Same work as that described under No. 9813 of the D.C.S. MSS., Vol. XVIII.

Incomplete.

Foll. 47 and 48a contain a few lines of Garuḍapurāṇōktānusandhāna. Fol. 48b is left blank. Fol. 49 contains some lines from the स्मृतिसङ्ग्रह of ताम्रपर्णिश्रीनिवासाचार्य. Fol. 50 contains a few sentences dealing with एकादशीनैवेद्यसमर्पण.

---

(c) स्मृतिसङ्ग्रहः.

SMṚTISAṄGRAHAḤ.

Foll. 51a—130b.

By Tāmraparṇi Śrīnivāsācārya. Similar to the work described under No. 2808 of the D.C.S. MSS., Vol V.

Incomplete.

**Beginning :**

श्रीताम्रपर्णीश्रीनिवासाचार्यकृतस्मृतिसङ्ग्रहः ॥

व्यासं विश्वपतिं नत्वा पूर्णबोधादिकान् गुरून् ।
नत्वा मन्वादिकांश्चैव क्रियते स्मृतिसङ्ग्रहः ॥

जा(त)कर्म । दर्पणे—

नारी यदा पुंसवनं विहाय सूयेत सीमन्तमृतेऽपि पुत्रम् ।
गृहीतपुत्रा विधिवत्तु(त्वु)नश्च सीमन्तमर्हत्यथ तस्य माता ॥
जाते कुमारे जनकस्सचेलं स्नात्वाथ विप्रैरथ जातकर्म ।
कुर्वन् शिशोर्नामविविश्चलनात्प्राक्पुण्याहनान्दीमुखमत्र शाखम् ॥

**End:**

ततः पितुः प्रेतकार्याणि कृत्वा तत्तत्काले षोडश श्राद्धानि कृत्वा संवत्सरे पूर्णे सपिण्डीकरणं कार्यम्; अन्यथा संवत्सरात्पूर्वं न कार्यम्। यत्तु द्वादशाहादौ सपिण्डीकरणविधानमस्ति तद्वृद्धिनिमित्तविषयम्। पुनस्सपिण्डीकरणे।

---

(d) गरुडपुराणम्.

GARUḌAPURĀṆAM.

Foll. 131a—153a.

Contains Adhyāyas six to nine of the Brahmakāṇḍa forming part of the Garuḍapurāṇa, which are the same as those found in the printed edition of the Garuḍapurāṇa (Śrī Vēṅkaṭēśvara press). These four Adhyāyas contain the eulogies on Viṣṇu made by the deities, subordinate to Him, and by the sages and saints of olden times.

**Beginning:**

श्रीकृष्णः—

तत्र स्थितानि तत्त्वानि तथा तत्त्वाभिमानिनः ।
स्वे स्वे ह्यायतनाभावात्तदर्थं च खगेश्वर ॥
हरिं नारायणं सम्यक् स्तोतुं समुपचक्रमुः ।
तारतम्यानुसारेण प्रत्येकं हीडिरे हरिम् ॥
तत्राप्यादौ हरिं लक्ष्मीः स्तोतुं समुपचक्रमे ।
चिन्त्याचिन्त्यगुणा विष्णोर्विरुद्धास्सन्ति सद्गुणाः ॥

* * * *

**Colophon :**

इति श्रीगरुडपुराणे ब्रह्मकाण्डे श्रीकृष्णगरुडसंवादे षष्ठोऽध्यायः ॥

**End :**

न स्मरन्तो(न्तु)त्तमं विष्णुं तारतम्यानुसारतः ।
पावनं विष्णुनैवेद्यं न भुञ्जानो द्विजाधमः ॥
रमाब्रह्मादीनां तु अदत्वा भुञ्जन्ति मानवाः ।
तैर्भुक्ता सततं विष्ठा सदा क्रिमिशतैर्युता ॥

**Colophon :**

इति श्रीगरुडपुराणे ब्रह्मकाण्डे श्रीकृष्णगरुडसंवादे नवमोऽध्यायः ॥

The scribe adds the following stanzas :—

काश्यी(श्य)वंशसम्भूतमाधवाचार्यवंशजः ।
रामचन्द्रार्यतनयानन्दतीर्थार्यनामहि(कः) ॥
तेनायं कृष्णगरुडसंवादं लोकतारकम् ।
पठतां शृण्वतां नित्यं विष्णुप्रीतिकरं शुभम् ॥
प्रजोत्पत्तिनामके चाब्दे श्रावणे चाद्यपक्षके ।
पौर्णम्यां(मास्यां) भानुवारे लिखितं प्रीत्यै माधवमध्वयोः ॥

---

(c) गोविन्दस्तवराजः.

GŌVINDASTAVARĀJAḤ.

Foll. 153b—159b.

This is a hymn in praise of Gōvinda or Viṣṇu and is taken from the thirteenth Adhyāya of the Kartikamāhātmya of the Skāndapurāṇa.

Complete.

**Beginning :**

श्रीशौनक उवाच—

अम्बरीष शुभं वाक्यं मयोक्तं शृणु भक्तितः ।
धर्मार्थकाममोक्षार्थं कुरु गोविन्दकीर्तनम् ॥

* * * *

यावन्न पठते जन्तुः गोविन्दस्य महास्तवम् ।
दुर्निमित्तानि भूपाल राजिकं दैविकं भयम् ॥

**End:**

वेदान्तपाठनिरतां(सक्तानां)सत्संसेवा विधीयते ।
आसनाद्युपचारैश्च पूजा कार्या हि सज्जन ॥

**Colophon:**

इति श्रीस्कान्दपुराणे शौनकाम्बरीषसंवादे कार्त्तिकमाहात्म्ये त्रयोदशोऽध्यायः ॥

The scribe adds—

प्रजोत्पत्तिनामके चाब्दे श्रावणे चाद्यपक्षके ।
पौर्णम्यां(मास्यां)भानुवारे[तु]गोविन्दस्तवमुत्तमम् ॥
माधवाचार्यपौत्रेण रामचन्द्रार्यसूनुना ।
आनन्दतीर्थेन लिखितं प्रीत्यै माधवमध्वयोः ॥

---

### R. No. **1435**.

Palm-leaf. 14½ × 1½ inches. (Foll. 130—139 are 7½ × 1½ inches in size.) Foll. 142. Lines, 6 in a page. Nandināgari. Fair.

Purchased in 1914-15 from M.R.Ry. Lakṣminarasiṁhācārya of Rāmēśvaram.

(*a*) विष्णुपञ्चकव्रतम्.

VIṢṆUPAÑCAKAVRATAM.

Foll. 1*a*—5*a*.

Same work as that described under No. 8524 of the D.C.S. MSS., Vol. XVI, but with four additional stanzas in the beginning.

Complete.

Fol. 5*b* contains a few lines of Svābhāntanāmāvali of Viṣṇu, etc.

(b) लक्षप्रदक्षिणव्रतकल्पः.

LAKṢAPRADAKṢIṆAVRATAKALPAḤ.

Fol. 6.

Same work as that described under No. 8449 of the D.C.S. MSS., Vol. XVI, but with slight difference at the end which is given below.

Complete.

**End :**

आसन्नप्रसवा नारी नीरपूर्णघटं यथा ।

* * * *

प्रदक्षिणा तु सा ज्ञेया नमस्कारसमा तु सा ॥

**Colophon :**

इति लक्षप्रदक्षिणविधिः ॥

---

(c) लक्षनमस्कारव्रतकल्पः.

LAKṢANAMASKĀRAVRATAKALPAḤ.

Foll. 6b—8b.

Same work as that described under No. 8445 of the D.C.S. MSS., Vol. XVI, but with the addition of four stanzas describing Namaskāralakṣaṇa.

Complete.

उरसा शिरसा दृशा मनसा वचसा तथा ।

पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥

* * * *

मम ध्यानेन संयुक्तो नमस्कार इतीरितः ॥

**Colophon :**

इति लक्षनमस्कारविधिः ॥

---

(d) लक्षवर्तिव्रतकल्पः.

LAKṢAVARTIVRATAKALPAḤ.

Foll. 8b—9b.

Similar to the work described under No. 8454 of the D.C.S. MSS., Vol. XVI. This is said to have been related by God Viṣṇu to Nārada, and the observance of the vow is said to remove all sins. This Vrata is to commence on the 11th day of the dark fortnight of the Āṣāḍha month and to come to an end on the full moon day of the bright fortnight of the Kartika month.

Complete.

**Beginning :**

नारदः—

ये चान्ये पापिनो लोके दानधर्मविवर्जिताः ।
कर्महीना व्रतभ्रष्टाः डम्भाचारसमन्विताः ॥

* * * *

तथापि वक्ष्ये विप्रेन्द्र यदुक्तं हरिणा पुरा ।
अनायासेन मर्त्यानां नारीणां च विशेषतः ॥
व्रतस्याचरणात् पापगन्धलेशो न विद्यते ।
चातुर्मास्ये तु संप्राप्ते माधवे शयनं गते ॥
नीराजनानि कार्याणि वर्तिलक्षेण नारद ।
आषाढस्यासिते पक्षे एकादश्यां समारभेत् ॥
कार्तिकस्य सिते पक्षे पौर्णमास्यां समापयेत् ।

**End :**

अग्ने नयेति मन्त्रेण जुहुयात् सघृतं चरुम् ॥
सहस्रं तु क्रमाद्धुत्वा होमशेषं समापयेत् ।
पात्रं च गुरवे दत्वा ब्राह्मणान् भोजयेत्ततः ॥
एवं कृते महाभाग मुच्यते सर्वकिल्बिषैः ।
गां च दद्यात् प्रयत्नेन स्वर्णशृङ्गां सवत्सकाम् ॥
वस्त्रादिभिः स्वर्चितां च श्रोत्रियाय कुटुम्बिने ।
एवं कृते महाभाग पूर्णं फलमवाप्स्यसि ॥

**Colophon :**

इति लक्षवर्तिकल्पः संपूर्णः ॥

(e) लक्षपुष्पसमर्पणविधिः.

LAKṢAPUṢPASAMARPAṆAVIDHIḤ.

Foll. 9b—11b.

Similar to the work described under No. 8447 of the D.C.S. MSS., Vol. XVI. This Vrata is to commence either in the month of Māgha or in Vaiśākha. It is stated to have been related by Nārāyaṇa to Brahman and the observance of the Vrata is said to have the power to confer longevity, health and merit and to ward off calamities.

Complete; said to form part of the Lakṣmīsaṁhitā.

**Beginning:**

श्रीब्रह्मा—

छिन्धि सर्वज्ञ देवेश सर्वसज्जनरक्षक ।
व्रतं ब्रूहि सुरश्रेष्ठ लक्षपुष्पस्य सर्वदा ॥

श्रीनारायणः—

शृणु ब्रह्मन् प्रवक्ष्यामि लक्षपुष्पव्रतं शुभम् ।
मूल्यादानीय पुष्पाणि विष्णवे च समर्पयेत् ॥
कालसङ्ख्यां प्रवक्ष्यामि माघे वैशाख एव च ।
पुष्पाणि पुरतो विष्णोः न्यस्य पुण्याहवाचनम् ॥
रात्रौ जागरणं कुर्यात् ब्राह्मणेभ्यः प्रदक्षिणम् ।
दापयेत्तु स्वशक्त्या वा वित्तशाठ्यं न कारयेत् ॥

**End:**

आयुरारोग्यदं पुण्यमपमृत्युहरं तथा ।
तस्मात् त्वमपि हे ब्रह्मन् ज्ञानं मोक्षं च विन्दसि ॥

**Colophon:**

इति लक्ष्मीसंहितायां हंसब्रह्मवादे लक्षपुष्पसमर्पणविधिः ॥

---

(f) लक्षतुलसीव्रतकल्पः.

LAKṢATULASĪVRATAKALPAḤ.

Foll. 11b—12b.

Same work as that described under No. 8440 of the D.C.S. MSS., Vol. XVI, but without the first stanza in the beginning and with a different colophon which is given below.

Complete

**Colophon:**

इति श्रीधर्मोत्तमे लक्षतुलसी उद्यापनं संपूर्णम् ॥

(g) लक्षदीपव्रतकल्पः.

LAKṢADĪPAVRATAKALPAḤ.

Foll. 12b—13b.

Similar to the work described under No. 8442 of the D.C.S. MSS., Vol. XVI.

Complete; as found in the Brahmāṇḍapurāṇa.

For the beginning see under No. 8442 referred to above.

**End:**

दीपप्रज्वलनोपेतं पञ्चवर्तिसमन्वितम् ।
दास्यामि लोकनाथेश सूर्यकोटिसमप्रभ ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे लक्षदीपव्रतकल्पः ॥

(h) लक्षपद्मव्रतकल्पः.

LAKṢAPADMAVRATAKALPAḤ.

Foll. 13b—14a.

Similar to the work described under No. 8446 of the D.C.S. MSS., Vol. XVI.

Complete; stated to form part of the Vāmanapurāṇa.

**Beginning:**

ब्रह्मोवाच—

देवदेवारविन्दाक्ष मायातीत महामते ।
इदानीं श्रोतुमिच्छामि लक्षपद्मव्रतं शुभम् ॥

श्रीभगवान्—

लक्षपद्मस्य माहात्म्यं शृणुष्व कमलोद्भव ।
एतद्व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ॥

सर्वेषामाश्रमाणां च स्त्रीणां चैव विशेषतः ।
चातुर्मास्यं समारभ्य यावदुद्बोधनं हरेः ॥
देवस्य सन्निधौ नारी पद्मान्येतानि कारयेत् ।
गोष्ठे वृन्दावने चैव नदीतीरे विशेषतः ।
पूर्वाह्णकाले कुर्वीत व्रतस्य फलभाग्भवेत् ॥

**End:**

बन्धुभिस्सह भुञ्जीत विष्णुभक्तिपरायणः ।
एवंकृते महाभाग विष्णुभक्तिं च विन्दति ॥
तस्मात्सर्वप्रयत्नेन कर्तव्यं व्रतमुत्तमम् ।
सुपुत्रकामिनी नारी सुपुत्रं चैव विन्दति ॥

**Colophon:**

इति श्रीवामनपुराणे लक्षपद्मव्रतकल्पः ॥

---

(८) लक्षस्वस्तिकव्रतकल्पः.

LAKṢASVASTIKAVRATAKALPAḤ.

Foll. 14b—15b.

Similar to the work described under No. 8466 of the D.C.S. MSS., Vol. XVI. This Vrata is to commence on the 10th day of the Āṣāḍha month, and by its observance King Kalmāṣa also called Saudāsa, who was cursed to become a devil is said to have been restored to his original state.

Complete.

**Beginning:**

युधिष्ठिरः—

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशन ।
येन चीर्णेन पुण्येन सर्वपापक्षयो भवेत् ॥
सर्वेषामाश्रमाणां च स्त्रीणां चैव विशेषतः ।
स्त्रीणां तु दुर्लभं येन स्वल्पायासेन सिध्यति ॥
तद्व्रतं ब्रूहि विश्वात्मन् विष्णुप्रीतिकरं शुभम् ।

श्रीकृष्णः—

शृणु कौन्तेय वक्ष्यामि व्रतं पापप्रणाशनम् ॥
सर्वेषामेव सुलभं गुरुहत्यापवादनम् ।
पुरा कल्माषनृपतिः गुरुद्रोहसमुद्भवात् ॥
किल्बिषात् क्रूरकर्मा च पिशाचत्वमवाप्तवान् ।
बोधितो ब्रह्मऋषिणा चकार व्रतमुत्तमम् ॥
लक्षस्वस्तिकसंज्ञं च व्रतस्यास्य प्रभावतः ।
पिशाचजन्मतो मुक्तः पश्चाद्राज्यमवाप्तवान् ॥

* * * *

चातुर्मास्ये तु संप्राप्ते दशम्यामारभेद्व्रतम् ।
पुण्याहं वाचयित्वा तु प्राशयेत्पञ्चगव्यकम् ॥
सङ्कल्पं च ततः कुर्याद्यावत्कार्त्तिकपौर्णमी(पूर्णिमा) ।

**End:**

एवं कृत्वा व्रतं सम्यक् पवित्रं पापनाशनम् ॥
पूर्वजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
सर्ववर्णैस्सदा कार्यं स्त्रीभिश्चैव विशेषतः ॥

**Colophon:**

इति लक्षस्वस्तिककल्पं संपूर्णम् ॥

---

(*j*) धारणपारणव्रतकल्पः.

DHĀRAṆAPĀRAṆAVRATAKALPAḤ.

Foll. 16*a*—17*b*.

Same work as that described under **No.** 8352 of the D.C.S. MSS., Vol. XVI, but with some difference in the end.

Complete.

**End:**

इति तं प्रतिभाष्याथ कृष्णस्तु स्वपुरीं ययौ ।
पू(ज्य)मानः पौरजनैः समस्तैर्यादवैर्विभुः ॥

युधिष्ठिरोऽपि राजर्षिश्चकारेदं महाव्रतम् ।
विमुक्तस्सर्वपापेभ्यस्सर्वत्र सुखमाप्तवान् ॥

**Colophon:**

इति धारणपारणविधिस्संपूर्णः ॥

---

(k) चान्द्रायणव्रतकल्पः.

CĀNDRĀYAṆAVRATAKALPAḤ.

Foll. 17b—19a.

Deals with the manner of performing the religious expiatory penance Cāndrāyaṇa, according to which the daily quantity of food taken by a person which consists of fifteen mouthfuls at the full moon is diminished by one mouthful everyday during the dark fortnight and is increased in like manner during the bright fortnight. This Vrata may commence on any one of the four months, Aṣāḍha to Kārtika, and is to last for a month, and it is said to have been explained by Kṛṣṇa to Yudhiṣṭhira when the latter requested the former to suggest some means for wiping off the sin caused by the slaughter of his kinsmen in the battle field.

Complete; stated to form part of the Bhaviṣyōttarapurāṇa.

**Beginning:**

युधिष्ठिरः—

कृष्ण कृष्ण महाबाहो वासुदेव जनार्दन ।
नमस्ते पुण्डरीकाक्ष प्रसीद पुरुषोत्तम ॥
भीष्मादिबन्धुवधजन्यमहाघसङ्घं
हर्तुं वदस्व मम कारणमञ्जसा विभो ।
तथेन्द्रियाणां च ममापि निग्रह-
स्तेषां नियन्याय च मे व्रतं प्रभो ॥

श्रीभगवान्—

शृणु कौन्तेय वक्ष्यामि व्रतं चान्द्रायणं परम् ।
बन्ध्वादिवधदोषघ्नं सर्वेन्द्रियनियामकम् ॥

चातुर्मास्ये व्रते चापि मासि कौन्तेय सुव्रत ।
पुण्याहं कारयेत्पूर्वं पौर्णम्यांच(मास्यां) शुभे दिने ॥
पश्चात् सङ्कल्प्य राजेन्द्र तदारभ्य व्रतं चरेत् ।
चन्द्रवृध्या समश्नीयात् कुक्कुटाण्डप्रमाणतः ॥
दिने दिने हविर्ग्रासान् हानौ हानिं प्रकल्पयेत् ।
एवं मासेन पूर्णं स्यादेकं चान्द्रायणं व्रतम् ॥

**End :**

इदं व्रतं महापुण्यं सर्वपापप्रणाशनम् ।
सर्वयज्ञफलं पुण्यं व्रतानामुत्तमोत्तमम् ॥
ये च शृण्वन्ति सततं ये पठन्ति च मानवाः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon :**

इति श्रीभविष्योत्तरपुराणे चान्द्रायणव्रतकल्पस्संपूर्णः ॥

---

(*i*) अखण्डैकादशीव्रतकल्पः.

AKHAṆḌAIKĀDAŚĪVRATAKALPAḤ.

Foll. 19*b*—22*b*.

This Vrata consists in taking one meal on the tenth day, in total abstinence on the eleventh day, and again taking one meal only on the twelfth day during the dark and bright fortnights for a period of one year beginning with the Margasira month. It is said to have been taught by Nārada to King Ambariṣa and it is said to please God Viṣṇu.

Complete; stated to be the twelfth Adhyāya of the Mārgaśīrṣa-māhātmya forming part of the Skāndapurāṇa.

**Beginning :**

अम्बरीषः—

अखण्डैकादशी ब्रह्मन् विधिं सम्यक् समादिश ।
विष्णोस्संप्रीणनार्थाय प्रसादं कर्तुमर्हसि ॥

नारदः—

श्रृणुष्व नृपशार्दूल एकादश्यां व्रतं शुभम् ।
मार्गशीर्षादिमासेषु द्वादशीषु द्विजोत्तम ॥
शुभव्रतमिदं ग्राह्यमखण्डैकादशीव्रतम् ।
दशम्यां चैकभुक्तं तु एकादश्यामुपोषणम् ॥
द्वादश्यामेकभुक्तं वै अखण्ड इति कथ्यते ।

**End:**

एतत्ते सर्वमाख्यातमखण्डैकादशीव्रतम् ।
अम्बरीष महाभाग त्वं कुरु द्विजसन्निधौ ॥

नारदः—

एवमुक्त्वा द्विजश्रेष्ठः अनुज्ञां प्रतिगृह्य च ।
पूजितस्तेन देवर्षिर्ययौ बदरिकाश्रमम् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे मार्गशीर्षमाहात्म्ये अखण्डैकादशीकथनं नाम द्वादशोऽध्यायः ॥

---

(m) अखण्डैकादशीव्रतकल्पः.
AKHAṆḌAIKĀDAŚĪVRATAKALPAḤ.

Foll. 22b—27a. Fol. 27b is left blank.

Similar to the above.

Complete; said to form the thirty-fifth Adhyāya of the Pādmapurāṇa.

**Beginning:**

पाद्मे पञ्चत्रिंशाध्याये—

श्रीसूतः—

इदमन्यच्च वक्ष्यामि व्रतं त्रैलोक्यविश्रुतम् ।
सर्वपापप्रशमनं सर्वकामफलप्रदम् ॥
ब्रह्मक्षत्रियवैश्यानां शूद्राणां चैव योषिताम् ।
मोक्षदं कुर्वतां भक्त्या तद्विष्णोः परमं द्विजाः ॥

एकादशीव्रतं नाम सर्वकामफलप्रदम् ।
कर्तव्यं सर्वदा विप्रैस्स(स्तद्)विष्णुप्रीतिकारणात् ॥
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
यदि भुङ्क्ते स पापीयान् परत्र नरकं व्रजेत् ॥

**End:**

वाराहरूपहैमं च लक्ष्मीनारायणात्मकम् ।
संपूज्य बिम्बदानेन मोक्षलक्ष्मीप्रदो भव ॥
इमं मन्त्रं समुच्चार्य आचार्याय प्रदापयेत् ।
गोभूदानादि कर्तव्यं विशेषफलसिद्धये ॥

इति च पाद्मे अखण्डः ॥

---

(n) गरुडपञ्चमीव्रतकल्पः.

GARUḌAPAÑCAMĪVRATAKALPAḤ.

Foll. 28a—32a. Fol. 32b is left blank.

This vow is intended to be observed on the fifth day of the bright fortnight of the Śrāvaṇa month by a woman wishing to secure prosperity. It is said to have been inaugurated in honour of Garuḍa by the Goddess Pārvatī for the former having permitted the latter to perform the Ṛṣipañcamīvrata without causing molestation.

Complete; said to form part of the Skandapurāṇa.

**Beginning:**

ओं सङ्कल्प्य, शेषान्तर्यामिसङ्कर्षणप्रेरणया प्रीत्यर्थं षोडशोपचारपूजां करिष्ये—

दधानो हलं सौनन्दं श्वेतवर्णः कृताञ्जलिः ।
सहस्रमूर्धा द्वितीया कर्णभूषः प्रियायुतः ॥
वनमाली पीतवासाः ध्येयो विष्णोस्तु पृष्ठतः । ध्यानम् बिले ।
अनन्तस्सर्वनागानां दातारमवनीश्वरम् ।
फणासहस्ररुचिरं देवमावाहयाम्यहम् ॥ शेषमावाहयामि ।

हलं सौनन्दमाविभ्रदनन्त हरिवल्लभ ।
गृहाणार्घ्यं मया दत्तं नीलांकु(शुक)शशिप्रभ ॥

* * * *

साधु साधु महाप्राज्ञे यत् पृष्टोऽहं त्वयानघे ।
तत्तेऽहं संप्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥
श्रावणे मासि देवेशि सितपक्षस्य पञ्चमी ।
तत्र कार्यं व्रतमिदं सुवासिन्या महेश्वरि ॥
दन्तधावनपूर्वं तु मङ्गलं स्नानमाचरेत् ।

* * * *

रिपूणां वैभवं दृष्ट्वा मा भूदिति खगेश्वरः ।
इत्युक्तः पन्नगादस्तु गच्छन्ती मेनकात्मजाम् ॥
सापि दृष्ट्वागतं तार्क्ष्यमुवाचेत्थं तु पार्वती ।
खगेश्वर मा विरोधं कुरुष्वाद्य व्रतेऽत्र वै ॥
यदिष्टं वद मे तार्क्ष्य करिष्यामि तव प्रियम् ।
एवमुक्तस्तु पार्वत्या गरुडः प्राह तां प्रति ॥

गरुडः—

मेन[क]ात्मजे महाभागे वदिष्यामि ममेप्सितम् ।
तां पञ्चमीं तु मन्नाम्ना प्रसिद्धां कुरु पार्वति ॥
इत्युक्ता गरुडेनाथ ददौ तस्मै वरं च सा ।
खगेश्वर महाभाग त्वन्नाम्ना सागता तिथिः ॥
श्रावणी पञ्चमी भूयादिति सापि तथाकरोत् ।

**End:**

ये च शृण्वन्ति सततं द्विजाः स्वच्छस्वभावतः ।
यथाकामं च सौभाग्यं प्राप्नुयुर्नात्र संशयः ॥

**Colophon:**

इति श्रीस्कान्दपुराणे रुद्रपार्वतीसंवादे गरुडपञ्चमीव्रतकल्पः सम्पूर्णः ॥

(o) श्रवणोपवासव्रतकल्पः.

ŚRAVAṆŌPAVĀSAVRATAKALPAḤ.

Foll. 33a—35b.

This vow is intended to please God Viṣṇu. It should be commenced on the 12th day of the bright fortnight of the Bhādrapada month, when the moon is in the constellation Śravaṇa, by observing it as a fasting day and taking meals only on the next day, and thus it should be observed for one year thenceforward.

Complete; said to be found in the Bhaviṣyōttarapurāṇa.

**Beginning:**

युधिष्ठिर उवाच—

देवदेवारविन्दाक्ष पुराणपुरुषोत्तम ।
व्रतमेकं समाचक्ष्व त्वत्प्रीतिजनकं शुभम् ॥
सर्वसिद्धिप्रदं नृणां महापातकनाशनम् ।
सर्वसम्पत्करं चैव मोक्षदं च विशेषतः ॥

* * * *

पुरैवं विधिना पृष्टो मामुवाच जगत्पतिः ।
हयास्यो ब्रह्मणे तुभ्यं व्रतराजं वदाम्यहम् ॥
प्रोष्ठपद्यां सिते पक्षे द्वादश्यां श्रवणं यदि ।
तदारभ्य व्रतं कार्यं मानवैर्विष्णुतत्परैः ॥
संवत्सरव्रतमिदं विष्णुप्रीतिकरं नरः ।
कृत्वा चोद्यापनं कुर्याद्यथाविध्यनुसारतः ॥

**End:**

सदा कृत्वा व्रतं सम्यक् सर्वाभीष्टमवाप्य च ।
अन्ते जगाम च स्वर्गं देवदेवैश्च पूजितः ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे श्रावण्युपवासोद्यापनकथा समाप्तः(प्ता) ॥

(p) यमुनापूजा.
YAMUNĀPŪJĀ.

Foll. 36a—39b.

Same work as that described under No. 8119 of the D.C.S. MSS., Vol. XVI, but without the Saṅkalpa and with a different reading in the end as given below.

Complete.

नमस्कारप्रदक्षिणम्—

अनन्तस्सर्वनागानामधिपस्सर्वकामदः ।
अनेनानेन सुप्रीतः परत्र च परां गतिम् ॥

इत्युद्यापनम् । अथ वायनदानम्—यस्य स्मृत्या चेति समर्पणम् ॥

---

(q) अनन्तव्रतकथा.
ANANTAVRATAKATHĀ.

Foll. 40a—47a. Fol. 47b is left blank. Fol. 48 contains a few sentences of Dōranāśaprāyaścitta.

Same work as that described under No. 8167 of the D.C.S. MSS., Vol. XVI.

Complete.

---

(r) अनन्तव्रतोद्यापनम्.
ANANTAVRATŌDYĀPANAM.

Foll. 49a—52b.

Same work as that described under No. 8193 of the D.C.S. MSS., Vol. XVI, but with difference in the beginning and the end which are given below.

Complete.

**Beginning :**

युधिष्ठिरः—

देवदेव नमस्तेऽस्तु व्रतस्य परमाद्भुतम् ।
उद्यापनविधिं (ब्रूहि) अनन्तस्य च केशव ॥

कृष्णः—

विना ह्युद्यापनविधिं न व्रतस्य फलं भवेत् ।
तस्माद्यथातथा कुर्यात् वित्तशाठ्यं न कारयेत् ॥

**End:**

मासि भाद्रपदे प्राप्ते परिपूर्तौ व्रतस्थितः ।
चतुर्दश्यामुपोष्यैवं (पौ)र्णमास्यां समापयेत् ।
आदौ मध्ये तथा चान्ते कुर्यादुद्यापनं बुधः ॥

---

(*e*) विनायकपूजा.
VINĀYAKAPŪJĀ.

Foll. 53*a*—55*b*.

Same work as that described under No. 8691 of the D.C.S. MSS., Vol. XVI, but without the colophon.

Complete.

---

(*f*) नलोपाख्यानम्.
NALÔPĀKHYĀNAM.

Foll. 56*a*—61*a*.

Herein Lord Kṛṣṇa teaches to Yudhiṣṭhira who questions Him as to the best means of securing victory in the war against the Kauravas, the importance of duly conducting the worship of God Vināyaka on the 4th day of the bright fortnight of the lunar month Bhādrapada by narrating how King Nala got himself freed of all the evils that befell him by resorting to this kind of worship.

Incomplete.

**Beginning:**

निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज ।
अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसम्पदः ॥
पतिपत्न्योश्च कलहे बन्धुभेदे तथा नृणाम् ।
उदासीनेषु लोकेषु कथं सुमुखता भवेत् ॥
का(कां)देवतां नमस्कृत्य इष्टसिद्धिमवाप्नुयात् ।

सूतः—

सन्नद्धयोः पुरा विप्राः कुरुपाण्डवसेनयोः ॥
पृष्टवान् देवकीपुत्रः कुन्तीपुत्रं युधिष्ठिरम् ।
निर्विघ्नेन जयो मह्यं वद देवकिनन्दन ॥
कां देवतां नमस्कृत्य पूर्णराज्यं लभामहे ।

श्रीकृष्णः—

पूजयस्व गणाध्यक्षं गौरीजलसमुद्र(ठरसम्भ)वम् ।
तस्मिन् संपूजिते वीर ध्रुवं राज्यमवाप्स्यसि ॥

युधिष्ठिरः—

विघ्नेशस्य व्रतस्यास्य किं दानं कस्य पूजनम् ।
कस्मिन् वै मासि कार्यं स्यात् तन्मे विस्तरतो वद ॥

श्रीकृष्णः—

मासि भाद्रपदे शुक्ले चतुर्थ्यां पूजितो नृप ।
प्रातश्शुक्लति(क्ल)ले स्नात्वा मध्याह्ने देवमर्चयेत् ॥
स्वशक्त्या गणनाथस्य सुवर्णरजताकृतिम् ।
अथ वा मृन्मयं कुर्याद्वित्तशाठ्यं न कारयेत् ॥
पाशाङ्कुशधरं देवं सर्वकामार्थसिद्धये ।
विंशत्येकं मोदकानां विघ्नेशाय निवेदयेत् ॥

**End:**

. . . . स्मिन्विघ्नेशस्य जपं नरः ।
. . . लोकेऽस्मिन्भवत्येव न संशयः ॥
. . . . . . . . परिपूजय ।
नलोऽपि सत्वरं कृत्वा विघ्नेशस्य प्रपूजनम् ॥
सर्वान्नरी . . . . . . . ।

---

(u) स्यमन्तकोपाख्यानम्.

SYAMANTAKŌPĀKHYĀNAM.

Foll. 61*a*—63*a*. Foll. 63*b* is left blank.

The story of how Satrājit came to get back the precious gem Syamantaka, which conferred prosperity on the wearer, by the worship of Vināyaka duly conducted as stated above, is related herein.

Wants beginning.

**Beginning:**

अस्ति कश्चिन्मणिवरः . . . . . ॥
तं कदाचित्तदा कृष्णः सत्राजितमयाचत ।
न दत्तवानसौ तस्मै सत्राजिद्राजसत्तमः ॥

* * * *

तत्र जाम्बवतः कुञ्जमासाद्य यदुनन्दनः ।
तत्र कुञ्जे ददर्शासौ ज्वलन्तं तेजसा मणिम् ॥
स ययौ मणिमादातुं जाम्बवानप्यवारयत् ।

**End:**

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
विघ्नेशस्य प्रसादेन तौ पुण्यफलभागिनौ ॥
यः पठेच्छृणुयाद्वापि नित्यमेतत्समाहितः ।
सर्वान् कामानवाप्नोति पुत्रपौत्रप्रवर्धनः ॥

* * * *

सिध्यन्ति सर्वकार्याणि विद्यावान्धनवान् भवेत् ;
स्यमन्ताख्यं महापुण्यं सर्वपापप्रणाशनम् ॥

**Colophon:**

इति स्यमन्तकोपाख्यानं सम्पूर्णम् ॥

---

(४) कृष्णाष्टमीव्रतकल्पः.

KṚṢṆĀṢṬAMĪVRATAKALPAḤ.

Foll. 64*a*—69*a*.

Similar to the work described under No. 8266 of the D.C.S. MSS., Vol. XVI.

Complete; said to be found in the Harivaṁśa.

**Beginning:**

युधिष्ठिरः—

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
कृष्णाष्टम्या व्रतं ब्रूहि देवव्रत नमोऽस्तु ते ॥

भीष्मः—

वक्ष्ये तदद्भुतं दिव्यं सावधानमनाः शृणु ।
अद्य स्थित्वा निराहारः श्वो भुङ्क्ते परमेश्वरः ॥
भोक्ष्यामि पुण्डरीकाक्षः स्वस्मिन् जन्माष्टमीव्रते ।

**End:**

न कुर्वन्ति जयन्त्यां हि कृष्णजन्माष्टमीव्रतम् ।
श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ॥

* * * *

तन्नास्ति पातकं लोके यश्च साधयते द्विजम् ।
जयन्ती हरिते पक्षे श्रावणे रोहिणीयुते ॥

मुनिवर यत्र विष्णुभक्तो नियतमनास्तु कथामनन्यभक्तः ।
मतिमपि च यत्र विधाय मूर्ध्ना नमति श्रद्धो प्रयाति विष्णुधाम ॥ १

**Colophon:**

श्रौतस्मार्तादिकं कर्म निखिलं येन सूत्रितम् ।
तस्मै समस्तवेदार्थविदे विखनसे नमः ॥

काश्यपमाश्रमे समासीनं सर्ववेदवेत्तारं सर्वशास्त्रार्थतत्त्वज्ञमृषिं सुप्रसन्नमभिगम्य भगवन् केन विधानेन कैर्मन्त्रैः कं देवमर्चयन्तः परमं पदं गच्छेयुरिति सर्वभूतहिते रता मुनयोऽपृच्छन् । स तेभ्यः प्राह श्रुत्यनुकूलविधिना वैदिकैर्मन्त्रैर्देवेशं विष्णुमर्चयन्ते तद्विष्णोः परमं पदं गच्छेयुः.

* * * *

तस्मादालये विधिना विष्णोर्नित्यार्चनामनाहिताग्नीनामग्निहोत्रसमादेतच्चाग्निहोत्रफलन्दद्यादा[त्या]हिताग्नीनामप्येतत् सर्वप्रायश्चित्तहेतुकं सर्वकामावाप्त्यर्थं च द्वितीयं भवति.

* * * *

इति श्रीवैखानसे काश्यपप्रोक्ते ज्ञानकाण्डे प्रथमोऽध्यायः ॥

**End:**

वायव्यामपि कूपतटाकानामीशान्यामङ्कणेऽभिमुखमार्यास्थानं पार्श्वे हेतुमुख्यागारं दक्षिणे अधिकारिनियुक्तान्तमाग्नेय्यां महानसम् एवं त्रिप्राकारयुतं सुदृढं परिकल्प्य तदभिमुखमङ्गनावाटं प्राच्यान्तर्महानसं सर्वतस्तैनिकान्तमिति ॥

**Colophon:**

इति श्रीवैखानसे काश्यपप्रोक्ते ज्ञानकाण्डे अष्टादशोऽध्यायः ॥

वैश्यानां क्रयविक्रयागारं प्रत्यङ्मुखे दक्षिणे भोजनस्थानमन्यद्वैश्यसमं सर्वेषां नैरृत्यान्तैरिष्टभल्लातकनिम्बकल्पितं सूतीगृहं

* * * *

देवस्य दक्षिणे पार्श्वे दुर्गां सरस्वतीमुमामिन्द्रं शशिनं सूर्यं च संस्थाप्य त्रिकालं द्विकालमेककालं वार्चयेत् एते च पूजिता यस्य.

---

R. No. 1447.

Palm-leaf. 16¾ and 16⅛ × 1½ and 1¼ inches. Foll. 85. Lines, 6 in a page. Nandināgarī. Good.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigaḷ of Rāmēśvaram.

(a) अणुजयतीर्थविजयः.
ANUJAYATĪRTHAVIJAYAḤ.

Foll. 1a—7b.

A short eulogistic account of Jayatīrtha, a Mādhva Guru: by Vyāsatīrtha, a disciple of Jayatīrtha.

Complete.

**Beginning:**

नत्वा कृष्णं तथा मध्वं जयतीर्थगुरूनपि ।
वक्ष्ये श्रीमज्जयार्याणां स्तोत्रं सर्वसमृद्धिदम् ॥

श्रीमानिन्द्रः सुधीमान् गिरिशमुखसुरैः प्रार्थ्यमानं सुशास्त्रं
स्तोत्रं त्वेकाग्रबुध्द्या वृष[भ]तनुरभवच्छ्रीमदानन्दतीर्थात् ।
धृत्वा स्वच्छास्त्रभारं प्रतिदिनमशृणोद्वाच्यमानं सुशास्त्रं
प्रान्तेऽसौ सूपविश्य द्विजगणसहितो ग्रन्थभारं दधानः ॥

**End:**

चित्र श्रीमज्जयार्यैः कृतमपि विशदं विक्रमं को नु वक्ता
किन्तु स्मृत्यर्थमल्पं गुरुभिरनुदिनं वर्णितं वर्णितं मे ।
तेन श्रीमध्वनाथो गुरुकुलतिलको माधवो मानसिद्धो
भूयात् प्रीतस्समस्ता अपि गुरुगुरवः प्रीतियुक्ता भवन्तु ॥

**Colophon:**

इति श्रीमज्जयतीर्थपूज्यपादशिष्येण व्यासतीर्थयतिना रचितः अणुजयतीर्थविजयः संपूर्णः ॥

The scribe adds—

दुर्मुखाब्दे भौमवारे आषाढे सितपक्षके ।
रेवत्यृक्षे च षष्ठयां तु जयतीर्थमुनेस्तथा ॥

स्तोत्रं भक्त्या विलिखितं कुप्पनामाभिधायिना ।
लेखनेन सदा चैव मध्वेशः प्रीयतां मम ॥

---

(b) दण्डतीर्थमहिमा.
DAṆḌATĪRTHAMAHIMĀ.

Foll. 8a—13a.

Deals with the sacredness and religious importance of the holy collection of water known as Daṇḍatīrtha said to be found about three miles to the west of the Viṣṇu shrine at Śrīmuṣṇam in the South Arcot district.

Complete; said to occur as the seventy-first Adhyāya in the Śrīmuṣṇamāhātmya forming part of the Kāśīkhaṇḍa.

**Beginning:**

दक्ष उवाच—

देवदेव विरूपाक्ष करुणाकर शङ्कर ।
संसारभयभीतानां जनानां पापकारिणाम् ॥
स्वहिते सुष्टदृष्टीनां भक्तानां विष्णुपादयोः ।
त्वं गुरुर्हितकृद्बन्धुर्मोक्षादिपुरुषार्थदः ॥
कथं तेषां गतिर्भूयात्तन्मे ब्रूहि महामते ।
इति तेनार्थितः शम्भुस्सन्तोषाकुलमानसः ॥
व्याहर्तुकामो देवेशं नारायणमनामयम् ।

* * * *

क्षेत्राणामुत्तमं क्षेत्रं श्रीमुष्णं पापनाशनम् ।
पूर्वाम्भोधेः पश्चिमे तु कावेर्या उत्तरे तटे ॥
वृद्धाचलात्पूर्वभागे गरुडायास्तु दक्षिणे ।
वर्तते तत्र तीर्थानि सन्ति पापहराणि वै ॥
तेषां तु महिमा लोके पुराणेषु च गीयते ।
विमानात् पश्चिमे भागे सार्धक्रोशविदूरतः ॥
तीर्थमस्ति महत्पुण्यं यतिरूपं मरुत्कृतम् ।
दण्डतीर्थमिति ख्यातं स्नानादघनिवारकम् ॥

**End:**

तस्मात् पुण्यतमे तीर्थे स्नानं कुर्यात् प्रयत्नतः ॥
ऋषिस्तु भगवान् ब्रह्मा देवता भगवान् हरिः ।

त्रिष्टुप् छन्दस्तु विज्ञेयं बलित्थेत्यादिका ऋचः ॥
जप्यादेवं तु विज्ञानं येनाधीस्सन्तरिष्यसि ।
इत्येतत्कथितं विप्र गोप्याद्गोप्यतरं शुभम् ॥
वेणुतीर्थस्य माहात्म्यं पूर्णप्रज्ञमुनेस्तथा ।
शिष्यत्वात्तव वै प्रोक्तमित्युक्त्वान्तर्दधे शिवः ॥

**Colophon:**

इति श्रीकाशीखण्डे तीर्थप्रशंसायां दक्षशङ्करसंवादे श्रीमुष्णमाहात्म्ये एकसप्ततितमोऽध्यायः ॥

Fol. 13b contains a few stanzas of Daṇḍatīrthamahiman as found in the Nāradapurāṇa.

---

(c) मध्वाचार्यप्रशंसनम्.

MADHVĀCĀRYAPRAŚAṀSANAM.

Foll. 14a—25a. Fol. 25b is left blank.

A eulogistic description of the birth and the leading incidents in the life of Ānandatīrtha or Madhvācārya, who was considered to be an incarnation of Vāyu or the god of Wind. He was born as the son of Madhyagēha.

This is stated to have been taken from the ninth Adhyāya of the Śrīmuṣṇamāhātmya forming part of the Brahmāṇḍapurāṇa, from the Madhyabhāga of the same Purāṇa and from the 160th Adhyāya of the Uttarakāṇḍa of the Skāndapurāṇa.

Complete.

**Beginning:**

श्रीदक्ष उवाच—

देवदेव महादेव उमाकान्त सदाशिव ।
अष्टाविंशत्कलौ प्राप्ते नष्टधर्मा (र्मे) जगत्त्रये ॥
पाषण्डमयमूयिष्टं जगदेतच्चराचरम् ।
सच्छास्त्रश्रवणं नास्ति सम्यक् ज्ञानं तिरोहितम् ॥

राक्षसाः कलिमाश्रित्य जाता विप्रकुले . . . ।
इति विज्ञाप्य देवेशं नम कृत्वाग्रतस्स्थितः ॥

श्रीशङ्करः—

साधु साधु महाप्राज्ञ प्रश्नोऽयं धर्मवत्तरः।
एवं धर्मा विनष्टास्स्युः सच्छास्त्राणि कलौ युगे ॥

* * * *

भगवान्—

अहं व्यासतनुर्भूत्वा तिष्ठामि बदरिकाश्रमे ।
वायुस्तच्छिष्यतां प्राप्य उद्धरिष्यति सज्जनान् ॥
इति विज्ञाप्य देवांश्च वायुमाहूय चाब्रवीत् ।
त्वं तु विप्रकुले भूत्वा यतिरूपेण सज्जनान् ॥
उद्धरस्व महाबाहो जित्वा मणिमदादिकान् ।
वेदशास्त्रार्थतत्त्वज्ञान् सज्जनान् कुरु सुव्रतान् ॥
एतच्छ्रुत्वा हरेर्वाक्यं स्वलोकं जग्मिरे सुराः ।
वायुश्च भगवान् देवो माणिभद्रं समाविशत् ॥
वायुरावेशसंयुक्तो माणिभद्रोऽप्यजायत ।
मध्यगेहस्य भार्यायां द्वात्रिंशल्लक्षणैर्युतः ॥
जातमात्रात्ततो देवः प्रविवेश यथापुरम् ।
गर्भदुःखविवर्जस्तु वर्धयन् स बभूव ह ॥

* * * *

निराकृत्य च पाषण्डं मिथ्यावादं महामतिः ॥
तुष्यन्ति मुनयस्सर्वे भविष्यन्ति च निर्भयाः ।
कलौ तु पापभूयिष्ठे सज्ज्ञानं नश्यति ध्रुवम् ॥

इति श्रीब्रह्माण्डपुराणे श्रीमुष्णमाहात्म्ये नवमे अध्याये ।

* * * *

राजद्वारं समासाद्य कृत्वा दुःशास्त्रखण्डनम् ।
व्याकरिष्यति सच्छास्त्रं सगुणब्रह्मवाचकम् ॥

इति श्रीब्रह्माण्डपुराणे मध्यभागे कृष्णमाहात्म्ये श्रीमदानन्दतीर्थाचार्यप्रशंसनम्.

**End:**

इत्येतद्धर्ममखिलं ज्ञात्वा सच्छास्त्रमुत्तमम् ।
श्रुत्वा पठेन्मध्वशास्त्रं विष्णूद्रेकाय कथ्यते ॥

इत्येतद्धर्ममखिलं ज्ञात्वा श्रीमध्वशास्त्रगुणपरिप्रवाहे योऽवगाहति हरिं ध्यायन् नरस्स याति हरिचरणारविन्दम् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे उत्तरकाण्डे उमामहेश्वरसंवादे मध्वमतप्रशंसनं नाम षष्ठिशततमोऽध्यायः ॥

* * * *

द्वात्रिंशल्लक्षणैर्युक्तो गर्भदुःखविवर्जितः ।
स एवानन्दतीर्थेति भुवि ख्यातोऽखिलैर्जनैः ॥

इति च वाराहे ।

The name of the scribe and the date of transcription are given thus:

दुर्मुखिसंवत्सरमाघशुद्धदशमीबुधवारदिनतायिनूरुकुप्पन्नसेवे.

---

(*d*) तुलसीस्तवराजः.

TULASĪSTAVARĀJAḤ.

Foll. 26*a*—27*b*.

A eulogy on the plant Tulasī, which is conceived to be a goddess. The concluding stanzas describe the religious efficacy of the repetition of this eulogy.

Complete; said to form the 39th Adhyāya of the Vṛddhapadmapurāṇa.

**Beginning:**

नारायणः—

स्तवराजमतो वक्ष्ये तुलसीतोषकारणम् ।
यस्याध्ययनमात्रेण सर्वमङ्गलभाग्भवेत् ॥
तुभ्यं नमो महादेवि लक्ष्मीप्रियसखि क्षमे ।
सीते रुक्मिणि पद्मेति श्रीमन्तं मां विदेहि भो ॥
सरस्वति नमस्तुभ्यं खिन्नभक्ताभयप्रदे ।
शुभदे देहि मे लक्ष्मी देवैर्नतपदाम्बुजे ॥

**End:**

दशसाहस्रजापेन साक्षान्नारायणो भवेत् ।
स्त्रिया जप्यं सुमाङ्गल्यं विशेषेणार्थसिद्धये ॥
या परस्तात् द्वादशाब्दात्पुरस्ताद्विंशतेरपि ।
स्त्री ब्राह्मणी पतिमती जपेत् कामार्थसिद्धये ॥
उपवासदिने जप्तं सहस्रगुणितं भवेत् ॥

**Colophon:**

वृद्धपाद्मे तुलसीस्तवराजो नाम एकोनचत्वारिंशोऽध्यायः ॥

---

(c) तुलसीकवचम्.

TULASĪKAVACAM.

Foll. 27b—29b.

Similar to the work described under No. 6829 of the D.C.S. MSS., Vol. XIII.

Complete; stated to be found in the 40th Adhyāya of the Vṛddhapādmapurāṇa.

**Beginning:**

नारायणः—

कवचं तव वक्ष्यामि भवसङ्कटनाशनम् ।
यस्य जापेन सिध्यन्ति सर्वार्थानामशक्नतः ॥
तुलसी पातु मे नित्यं शिरो वक्त्रं(वक्त्रं)सनासिकम् ।
श्रोत्रे नेत्रे ललाटं च भ्रूकपोले निरन्तरम् ॥

श्रीसखी पातु मे कण्ठं भुजौ वक्षोजकक्षकम् ।

**End:**

यत्पृष्टमासीद्भवता द्विजेन्द्र तदुक्तवानस्मि मनोज्ञबन्धम् ।
मास्म त्वमस्मत्कथितं कथार्थं विस्मर्तुमर्हस्यतिविस्मितार्थम् ॥

**Colophon:**

इति बृहत्पाद्मे तुलसीकवचं नाम चत्वारिंशोऽध्यायः ॥

---

(*f*) तुलसीकवचम्.

TULASĪKAVACAM.

Foll. 29*b*—30*a*.

Same work as that described under No. 6329 of the D.C.S. MSS., Vol. XIII, but with slight difference in the beginning and end and without Pūrvapīṭhikā

Complete.

**Beginning:**

ब्रह्माण्डपुराणे सुब्रह्मण्याय उपदेशं कृतम् ।
शङ्करः—
तुलसीकवचमन्त्रस्य अहमेव ऋषिस्स्मृतः ॥
अनुष्टुप् छन्द इत्युक्तं देवता तुलसी स्वयम् ।
तुलसी मे शिरः पातु फालं पङ्कजमालिनी ॥

**End:**

इतीदं परमं गुह्यं तुलस्याः कवचामृतम् ।
मर्त्यानाममृ(त)त्वाय भीतानाममृताय च ॥
मोक्षाय च मुमुक्षूणां श्रीकामानां श्रियै तद ।

**Colophon:**

इति तुलसीकवचं संपूर्णम् ॥

---

(*g*) तुलसीपूजा.

TULASĪPŪJĀ.

Foll. 30*a*—33*a*.

Same work as that described under No. 8315 of the D.C.S. MSS., Vol. XIII, but the additional stanzas and Pūrvapīṭhikā are given below.

Complete; stated to occur as the fifth Adhyāya of the Vāmana-purāṇa.

**Beginning:**

पार्वती—

रोप्यते केन विधिना तुलसी पूज्यते तथा।
तमाचक्ष्व ममेशान मय्यनुग्रहकारणात् ॥
* * * *
गायत्र्याष्टशतं जप्त्वा तुलसीमथ पूजयेत् ।
प्राङ्मुख उदङ्मुखो वापि स्थित्वा प्रयतमानसः ॥

**End:**

इदं तु तुलसीपूजास्तोत्रमाहात्म्यमेव च ।
लेखयेद्वा पठेद्वापि स गच्छेद्वैष्णवं पदम् ॥

**Colophon:**

इति श्रीवामनपुराणे तुलसीमाहात्म्ये पञ्चमोऽध्यायः ॥

---

(A) तुलस्यष्टोत्तरशतनामस्तोत्रम्.

TULASYAṢṬOTTARAŚATANĀMASTOTRAM.

Foll. 33a—37b.

Similar to the work described under No. 9104 of the D.C.S. MSS., Vol. XVII.

Complete; said to be found in the 35th Adhyāya of the Padma-purāṇa.

**Beginning:**

गौतमः—

अष्टोत्तरशतं नाम्नां तुलस्या ज्ञानसिद्धिदम् ।
प्रवक्ष्यामि महाबुद्धे येन विद्यामवाप्स्यति ॥
ऋषिस्तु भगवान् भर्गः तस्य मन्त्रस्य कीर्तितः ।
अनुष्टुप् छन्द इत्युक्तं ज्ञानार्थे विनियुज्यते ॥

तुलसी श्रीसखी देवी देवपाला दिवस्सखी ।
धारिणी धरणी धात्री सावित्री सत्यसङ्गता ॥
कल्हारिणी च गौर्यङ्गा देवगीता यवीयसी ।

**End:**

सदानन्दा तु संहर्त्री पानीदान(?)मया वनात् ।
श्रुतिस्मृत्यात्मकत्वेन निरुक्तमिदमुत्तमम् ॥

इत्येवमुक्त्वा भगवान् पुनर्ययौ स्वमाश्रमं श्रीनिलयं महामुनिः ।
पुत्रोऽपि तस्याप्रतिरूपपौरुषः सदैव देवीं प्रचय(णतः) : समाप(भ)जत् ॥ ? ॥

**Colophon:**

इति श्रीपाद्मे पञ्चत्रिंशोऽध्यायः ॥

---

(*i*) तुलसीस्तुतिः.

TULASĪSTUTIḤ.

Foll. 37*b*—38*a*.

Similar to the work described under sub-division (*d*) *ante*.

Complete.

**Beginning:**

राजा—

जगद्धात्रि नमस्तुभ्यं लोकमात्रे नमो नमः ।
अणुर्भवाश्रया देवाः सृष्टिस्थित्यन्तकारिणः ॥
त्वन्मायाजृम्भणमिदं जगत् स्थावरजङ्गमम् ।
त्वत्पूजासक्तमनसां निकटे मुक्तपद्धतिः ॥
त्वत्पादपूजायुक्तानां दुर्लभं किं सुरेश्वरि ।
यस्मै प्रसन्ना त्वं देवि संस्थाप्य जगतीतले ॥

**End:**

तेन प्रीतो महाविष्णुः स्वयं पुत्रत्वमाप्नुयात् ।
आगामिचैत्रमासे तु जातः पुत्रो भविष्यति ॥

इति दत्वा वरं देवी क्षणादन्तर्हिता ययौ ॥

**Colophon:**

इति तुलसीस्तुतिः ॥

Foll. 38*a* to 39*a* contain a few stanzas on the Tulasi plant. Fol. 39*b* is left blank. Foll. 40—43 contain passages dealing with gifts to be made in the month of Kārtika.

---

(*j*) ज्वरस्तोत्रम्.

JVARASTŌTRAM.

Foll. 44*a*—46*b*. Fol. 47 is left blank.

A eulogy on Kṛṣṇa said to have been made by Śiva's fever. The allusion is to the Puranic story of the havoc caused by the two kinds of fever emanating from Viṣṇu and Śiva repectively, and therefore known as Viṣṇu's fever and Śiva's fever and Lord Kṛṣṇa's overcoming the latter kind of fever.

This is different from what is contained in the Adhyāyas 122 and 123 of the printed copy of Harivaṁśa.

Complete.

**Beginning:**

तमुवाच ज्वरो भूयः साक्षाद्विष्णुमपि स्वयम् ।
प्रणम्य शिरसा देवं कृताञ्जलिपुटस्ततः ॥

ज्वरः—

नमः कृष्णाय हरये विष्णवे प्रभविष्णवे ।
आदिदेवाय देवाय पुराणाय गदाभृते ॥

* * * *

अहमेको ज्वरो देव भविता प्राणिनां हरे ।
त्वत्प्रसादेन नान्यः स्याज्ज्वरस्त्वमिति वर्धन ॥

ततस्तुष्टो हृषीकेशः स्तोत्रेणानेन केशवः ।
प्रीतिमांश्चाभवत्कृष्णो रौद्रं ज्वरमुवाच ह ॥

एक एव ज्वरो अस्तु भवानेव यथासुखम् ।
अन्तकाले मनुष्याणां भूयाद्रोगाय मामकः ॥

**End:**

एवमस्त्विति गोविन्दं बभाषे केशवं तदा ।
प्रणम्य शिरसा विष्णुं भक्तानामभयङ्करम् ।
वासुदेवं महात्मानमपाक्रान्तस्ततो रणात् ॥

**Colophon:**

इति हरिवंशे माहेश्वरस्तुतिः समाप्ता ॥

---

(*k*) होलिकाविधानम्.

HÓLIKÀVIDHÀNAM.

Foll. 48*a*—51*a*.

Same work as that described under No. 1435(*a*-9) *ante*.

Complete.

---

(*l*) होलिकाविधानम्.

HÓLIKÀVIDHÀNAM.

Foll. 52*a*—54*b*. Fol. 55 is left blank. Fol. 56 contains the names of some of the works in this manuscript.

Duplicate copy of the previous work.

---

(*m*) पवित्रश्रुतिव्याख्या.

PAVITRAŚRUTIVYÀKHYÀ.

Foll. 57*a*—60*b*.

A commentary on the first verse of the eighty-third Sūkta of the ninth Maṇḍala of the Ṛgvēda beginning with Pavitram, etc., which is here said to enjoin the marking of the body with the heated metallic representations of the conch and the discus of God Viṣṇu.

Complete.

**Beginning:**

तथाहि ऋग्वेदे—

पवित्रं ते विततं ब्रह्मणस्पते ( . . ) श्रितास इहहन्तस्तत्समासतेति । इयं श्रुतिः तप्तमुद्राधारणं विधत्ते । अस्याः श्रुतेरयमर्थः—ब्रह्म-

णो वेदस्य चतुर्मुखस्य ब्रह्मजातेश्च पते रक्षक इति विकासस्सम्बोधनम् । प्रभुः त्वं विश्वतो विश्वेषां गात्राणि पर्येषि व्याप्तोऽसि अन्तर्यामिरूपेण वर्तसे । तादृशस्य ते तव पवित्रं सुदर्शनम् । पवित्रमिति सुदर्शनस्य संज्ञा ।

**End:**

समुद्रियं समुद्रिक्तमपां कर्मणामूर्मिं तरङ्गरूपं संसारं तस्मिन्नपो मातरिश्वा दधाती(ती)शावास्यश्रुतिव्याख्यानावसरे अपः कर्माधीतिव्याख्यातत्वात् ।

ऊर्ध्वपुण्ड्रगदाहीना नारी निस्सार उच्यते ।
विद्यासुखेन यो राजन् ब्राह्मणो वर्ततेऽनिशम् ॥
स स्नातस्सर्वतीर्थेषु तप्तं तेनाखिलं तपः ।

* * * *

श्वेतद्वीपो दिवस्स्रोतस्तत्र मध्यं सरोवरम् ।
लोकत्रयविवक्षायां परतो लक्षयोजनात् ॥

प्रतिबिम्बत्वं नाम तदधी(न)त्वे सति तत्सदृशत्वं प्रतिबिम्बत्वम् ।

Foll. 60*b*—63*b* contain a few stanzas of Rāmāvatārādikālanirṇaya.

---

(क) अश्वत्थोपनयनम्.

ASVATTHOPANAYANAM.

Foll. 63*b*—66*b*.

Slightly different from the work described under No. 8212 of the D.C.S. MSS., Vol. XVI, in the beginning and end.

Complete.

**Beginning:**

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनाद्यष्टमे वर्षे द्वादशैकादशेऽपि वा ॥
उक्ताः कालास्त्रयदशस्ताः कुर्यात्तत्रोपनायनम् ।

**End:**

प्रतिबन्धविनिर्मुक्तस्सर्वान् भोगानवाप्स्यति ।
कुलकोटिं समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥

**Colophon:**

इति अश्वत्थोपनयनं समाप्तम् ॥

---

(c) गोपालाष्टोत्तरशतनामस्तोत्रम्.

GŌPĀLĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 66*b*—69*a*.

Same work as that described under No. 8924 of the D.C.S. MSS., Vol. XVII, but the additional stanzas of Pūrva-pīṭhika in the beginning and the additional stanzas of Phalaśruti in the end are given below.

Complete.

**Beginning:**

कैलासशिखरे देवी पप्रच्छ रहसि स्थितम् ।
केनोपायेन मर्त्यानां मन्त्रसिद्धिर्भवेत्सदा ॥

* * * *

जयदं सर्वलोकानां राजवश्यकरं परम् ॥

**End:**

इत्येवं गोपिकानाथनाम्नामष्टोत्तरं शतम् ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥

* * * *

माधवाय नमस्तेऽस्तु हयग्रीवाय ते नमः ।

**Colophon:**

इति पाराशरस्तोत्रं संपूर्णम् ॥

(p) पूर्वादिदिङ्नामनिर्वचनम्.

PŪRVĀDIDIṄNĀMANIRVACANAM.

Foll. 69b—76a.

Gives the Puranic stories relating to and the origin of the names of and other details connected with the various directions, viz., east, west, north, and south. As stated herein it forms the Adhyāyas 110 to 113 in the Udyōgaparvan of the Mahabharata.

Complete.

**Beginning:**

उद्योगपर्वणि १[०]१० अध्याये

सुपर्णः—

अनुशिष्टोऽस्मि देवेन गालवज्ञानयोगिना ।
ब्रूहि कामनुयास्यामि द्रष्टुं प्रथमतो दिशम् ॥
पूर्वां वा दक्षिणां चेमामथवा पश्चिमां दिशम् ।
उत्तरां वा द्वि(जश्रे)ष्ठ कुतो गच्छामि गालव ॥
यस्यामुदयते पूर्वं सर्वलोकप्रभावनः ।
सविता यत्र साध्यानां सिद्धानां वर्तते तपः ॥

**End:**

उद्यतोऽहं द्विजश्रेष्ठ तव दर्शयितुं जगत् ।
पृथिवीं चाखिलां ब्रह्मन् तस्मादारोह मां द्विज ॥

**Colophon:**

इति उद्योगपर्वणि सुपर्णगालवसंवादे श्याकर्म(श्यामकर्ण)अश्वसम्पादने विश्वामित्राय दातुं त्रयोदशोत्तरशततमोऽध्यायः ॥

एवं पूर्वदक्षिणपश्चिमोत्तरदिशानिर्वचनप्रकारः ॥

Foll. 76b—79a contain a few stanzas of Yatinamaskāraviṣaya.

---

(q) सर्वतोभद्रमण्डलपद्धतिः.

SARVATŌBHADRAMAṆḌALAPADDHATIḤ.

Foll. 79b—84b.

On the drawing and worship of the design called Sarvatōbhadra.

Comptete.

**Beginning:**

प्रागुदीच्या कृता रेखा कुर्यादेकोनविंशतिः ।

इत्थं रेखा कृता चेत् त्रिशतोत्तरचतुर्विंशतिकोष्ठा भवन्ति । कोष्ठसङ्ख्या २०२४.

खण्डेन्दुस्त्रिपदा कोणे श्रृङ्खला पञ्चभिः पदैः ।

एकादशपदा वल्ली भद्रन्तु नवभिः पदैः ॥

**End:**

नवनीतोदनं वरुणाय यवोदनं वायवे प्रियङ्गो(ङ्ग्वो)दनं सोमाय गोदुग्धोदनमीशानाय अन्येभ्यो यथालाभः नैवेद्यशेषेण बलिः कार्या । अथ पूजाविधिः । इति समासम् ।

सप्तसमुद्राय स्वाहा । पर्यन्तर ऋक् । अन्येषां नाममन्त्रेण जुहुयात् ॥

**Colophon:**

इत सर्वतोभद्रमण्डलपद्धतिः ॥

---

## R. No. 1448.

Palm-leaf. 14⅝ × 1⅜ inches. Foll. 59. Lines, 5 in a page. Nandināgarī. Good.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigal of Rāmēśvaram.

(a) सङ्क्षेपसृष्टिप्रकारनिरूपणम्.

SAṄKṢĒPASṚṢṬIPRAKĀRANIRŪPAṆAM.

Foll. 1a—19b.

A short description of the creation of the universe, as based on the substance of what is stated in the Bhāgavatatātparyanirṇaya, the Viṣṇurahasya and the Varāhapurāṇa on this subject.

Complete.

**Beginning:**

श्रीमद्भागवततात्पर्यनिर्णयविष्णुरहस्यवराहपुराणादीनि यथाशक्त्या-लोक्य ध्यानार्थं सृष्ट्यादिकं सङ्क्षेपेण निरूप्यते—

तत्र भूगोलः—

ब्रह्माण्डं स्रष्टुकामोऽथ विष्णुर्लक्ष्मीमसेवत ।
तथा विंशतितत्त्वानां गणं युगपदाविशत् ॥

अनन्तरं विष्णुतत्त्वैस्सह रेतो रमायां विदधे । तद्रेतस्तदुदरं प्रविश्य तदैवोदके निपपात । तदैव सौवर्णं समावर्तकं ब्रह्माण्डं तैजसाद्राशेर-भवत् । ब्रह्माण्डान्तः पञ्चाशत्कोटिविस्तीर्णं भूमण्डलं वर्तते ।

**End:**

तस्मिन् मन्वन्तरे ब्रह्मन् शुचिरिन्द्रो भविष्यति ।
नारायणस्य तनयो बृहद्भानुस्तथा हरिः ॥
विनतायां महाराजन् कृपातन्तुवितानितः ।
राजंश्चतुर्दशैतानि त्रिकालानुगुणानि ते(वै) ॥
प्रोक्तान्येभिर्मनुः कल्पः युगसाहस्रपर्णयः ।

जविसृष्टिप्राकारः संक्षेपेण कथ्यन्ते—

Fol. 20 is left blank.

---

(*b*) ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Foll. 21*a*—35*b*.

Similar to the work described under No. 8230 of the D.C.S. MSS., Vol. XVI.

Incomplete.

**Beginning:**

आसनं प्राणानायम्य सप्तऋष्यन्तर्गतश्रीलक्ष्मीविद्व्यासप्रेरणया श्रीलक्ष्मीविद्व्यासप्रीत्यर्थं मया आचरितऋषिपञ्चमीव्रतस्य समग्रसंपूर्ण-फलावाप्त्यर्थं मया ज्ञानतोऽज्ञानतः कृतरजस्वलादिदोषपरिहारार्थम्

* * * *

सप्तर्षिपूजां करिष्ये इति सङ्कल्प्य

कश्यपस्सर्वलोकानां सर्वभूतहिते रतः ।
नराणां पापनाशाय ऋषिरूपेण संस्थितः ॥

कश्यपमावाहयामि

**End:**

पितोवाच—

शृणु पुत्र प्रवक्ष्यामि आवयो . . . . वान् ।
आर्जितं स्नुषया तत्र पुण्यं जन्मनि सप्तमे ॥
ऋषिव्रतस्समुद्भूत आवाभ्यां यदि दीप्यते ।
तेन . . . . . . . . . . . . . ॥

---

(c) कृष्णामृतमहार्णवः.

KṚṢṆĀMṚTAMAHĀRṆAVAḤ.

Foll. 36a—47b.

Inculcates the worship of Lord Kṛṣṇa, who is an incarnation of Viṣṇu. The importance of wearing the Ūrdhvapuṇḍra is explained in the concluding stanzas.

Incomplete. Breaks off in the 227th stanza.

**Beginning:**

अर्चितस्संस्मृतो ध्यातः कीर्तितः कथितः श्रुतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥
तापत्रयेण सन्तप्तं यदेतदखिलं जगत् ।
वक्ष्यामि शान्तये ह्यस्य कृष्णामृतमहार्णवम् ॥
ये नराः पशवो लोके किं तेषां जीवने फलम् ।
यैर्न वाधा(लब्धा)हरेर्दीक्षा नार्चितो वा जनार्दनः ॥

* * * *

आधारस्सर्वभूतानां येन विष्णुः प्रसाधितः ।
यज्ञानां तपसां चैव शुभानां चैव कर्मणाम ॥
तद्विशिष्टफलं नृणां तदेवाराधनं हरेः ।
कलौ कलिमलध्वंसि सर्वपापहरं हतम् (हरिम्) ॥

**End:**

ऊर्ध्वपुण्ड्रमृजुं सौम्यं ललाटे यस्य दृश्यते ।
स चण्डालोऽपि शुद्धात्मा पूज्य एव न संशयः ॥
अशुचिर्वाप्यनाचारः मनसा पापमाचरन् ।
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्रधरो नरः ॥

Foll. 48—49 are left blank.

---

(*d*) शीतलास्तोत्रम्.
ŚĪTALĀSTŌTRAM.

Size, 13 × 1¾ inches. Foll. 50*a*—51*b*.

Similar to the work described under No. 7397 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

अस्य श्रीशीतलास्तोत्रमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीशीतला देवता । श्री बीजम्, श्री शक्तिः, श्री कीलकम्, शीतलाप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं श्री शीतले शीतले शोकान् दाहय दाहय सर्वदा शमय शमय छेदय छेदय शीतले शीतले श्री ह्रीं श्रं॥.

स्कन्द उवाच—

भगवन् देवदेवेश शीतलायास्स्तुतिं शुभाम् ।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहाम् ॥

**End:**

शीतलास्तोत्रमेवैतन्न देयं यस्य कस्यचित् ।
दातव्यो न सदा तस्मै भक्तिश्रद्धान्विताय च ॥

**Colophon:**

इति शीतलास्तोत्रं संपूर्णम् ॥

शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ।
शीतले त्वं जगद्धात्री शीतलायै नमो नमः ॥

Fol. 51 contains a few stanzas of Adhimāsadāna.

---

(*e*) प्रमाणलक्षणम्.

PRAMĀṆALAKṢAṆAM.

Foll. 52*a*—55*b*.

By Ānandatīrtha. Same work as that described under No. 4808 of the D.C.S. MSS., Vol. X.

Complete.

---

(*f*) तत्त्वसङ्ख्यानम्.

TATTVASAṄKHYĀNAM.

Fol. 56.

By Ānandatīrtha. Same work as that described under No. 4788 of the D.C.S. MSS., Vol. X.

Complete.

---

(*g*) तत्त्वविवेकः.

TATTVAVIVĒKAḤ.

Foll. 57*a*—58*a*.

Same work as that described under No. 4785 of the D.C.S. MSS., Vol. X.

Complete.

(*b*) मायावादखण्डनम्.

MĀYĀVĀDAKHAṆḌANAM.

Foll. 58*a*—59*b*.

Same work as that described under No. 4835 of the D.C.S. MSS., Vol. X.

Complete.

---

R. No. **1449.**

Palm-leaf. 18 × 1¼ inches. Foll. 19. Lines, 5 in a page. Nandināgarī. Slightly injured.

Purchased in 1914-15 from M.R.Ry. Śinnaṇṇā Śāstrigal of Rāmēśvaram.

अणुजयतीर्थविजयः—सव्याख्यः.

AṆUJAYATĪRTHAVIJAYAḤ WITH COMMENTARY.

Foll. 1*a*—18*b*.

Same text as that described under R.No. 1447(*a*) *ante*. The commentary is by Veṅkaṭa, son of Mādhavācārya and disciple of Kṛṣṇavarya.

Complete.

**Beginning** of commentary :

वेदव्यासमहं वन्दे तत्त्वज्ञानार्थसेविनम् ।
नमामि श्रीमदानन्दान् जयार्यगुरुसेवितान् ॥
नमामि माधवाचार्यगुरूणां पादपङ्कजे ।
यैरहं पक्षिवत् सम्यक् शिक्षितोऽस्मि कृपालुभिः ॥
तान् वन्दे कृष्णवर्यांश्च सदा विद्यागुरून् मम ।
जयार्यविजयस्याहं कर्तुं व्याख्यामिहोद्यतः ॥

लोकानुग्रहकातराः(तत्पराः) श्रीमद्वेदव्यासस्वामिनः परममोक्षसाधनभूततत्त्वज्ञानस्य श्रीसदाचार्यपरमानुग्रहपात्रभूतजयार्याणां प्रसादेन विनाःनुदयात् तदर्थं तत्स्तोत्रं कर्तुकामास्सन्तः अविघ्नेन परिसमाप्त्यर्थं स्वेष्ट-

देवतानमनरूपमङ्गलं मनसि कृत्वा यस्य देवेति श्रुतेः श्रीमदाचार्याणां जयार्याणां च वन्दनं कृत्वा सन्निहितशिष्याशिक्षार्थं ग्रन्थादावुपनिबध्नन्तः स्वचिकीर्षितप्रतिज्ञां कुर्वन्ति नत्वेति । वक्ष्ये इति उत्तमपुरुषप्रयोगादह-मिति कर्ता लभ्यते । अहं श्रीमन्तश्च ते जयार्याश्च तेषां सर्वसमृद्धिदं सर्वेषां भक्त्यादिसाधनानां समृद्धिं ददातीति तत् स्तोत्रं स्तुतिं वक्ष्ये वच्मीत्यर्थः ।

**End:**

श्रीकृष्णः प्रीतः सन्तुष्टो भूयात् भवतु समस्ताः गुरुगुरवः रुद्रादीनां गु . . . . . . . . . . . . .

श्रीमदानन्दतीर्थाः समस्ता अपि अखिला अपि गुरवः प्रीतियुक्ताः प्रेम्णा युक्ताः भवन्त्विति अशेषमतिमङ्गलम् ॥

**Colophon:**

इति श्रीमत्कविकुलतिलकश्रीमद्वेदव्यासस्वामिविरचिताणुविजय- . . . . . . . . . . . . . . . . . . . . हृदये गोपमालावचन-नामिका ।

कृता वेङ्कटनाम्नासौ माधवाचार्यसूनुना ।

इति श्रीमत्पदवाक्यप्रमाणज्ञश्रीमन्माधवाचार्यसुतवेङ्कटनाथकृत- . . . . . . . विजयटीका समाप्ता ॥

Fol. 19 contains a few stanzas of Nṛsiṁhastōtravyākhyāna.

---

## R. No. 1450.

Palm-leaf. 18¾ × 1¼ inches. Foll. 47. Lines, 6 in a page. Nandi-nāgarī. Good.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigaḷ of Rāmēśvaram.

(a) कार्तिकमाहात्म्यम्.

KĀRTIKAMĀHĀTMYAM.

Foll. 1a—39a. Fol. 39b contains a few stanzas of Kārikāvali.

Deals with the importance of the Kārtika month (October-November) and describes the manner as well as the efficacy of bathing and giving gifts, etc., during that month.

Complete; stated to be found in the fourteenth Adhyāya of the Bhārdvājasaṁhitā of the Pañcarātrāgama.

**Beginning:**

कार्तिकस्य तु माहात्म्यं वद मे वदतां वर ।
कथं च कार्तिके मासि स्नानदानादिकाः क्रियाः ॥
कर्तव्याः किं फलं तस्य तत्सर्वं वद विस्तरात् ।
यदवश्यं च कर्तव्यं कार्तिके मासि सुव्रत ॥

श्रीहंसः—

साधु पृष्टं त्वया ब्रह्मन् लोकानुग्रहसिद्धये ।
कार्तिकस्य च मासस्य वक्ष्ये माहात्म्यमुत्तमम् ॥
कार्तिके मासि संप्राप्ते प्रातरुत्थाय चादृतः ।
अरुणोदयवेलायां शौचस्याचमनं तथा ॥
कृत्वा यथोक्तविधिना धृत्वा चैवोर्ध्वपुण्ड्रकम् ।
पश्चिमे जागरं कृत्वा स्नानं कुर्यात् बहिर्जले ॥

**End:**

ब्रह्मचारी भवेद्रात्रौ क्षितिशय्या भवेन्नरः ।
गृहस्थैश्च मिलित्वा तु स्वयं वा कारयेत् बुधः ॥
सर्वपापविमुक्त्यर्थं वनभोजनमुत्तमम् ।
कृत्वैव सर्वकार्याणि कृत्वा चैवं समर्पयेत् ॥
अश्वमेधसहस्रेषु वाजपेयशतेषु च ।
यत् फलं समवाप्नोति तत्फलं वनभोजनात् ॥

**Colophon :**

इति पाञ्चरात्रागमे भारद्वाजसंहितायां कार्तिकमाहात्म्ये भगवद्ब्रह्मसंवादे चतुर्दशोऽध्यायः ॥

---

(*b*) अणुजयतीर्थविजयः.

ANUJAYATĪRTHAVIJAYAḤ.

Foll. 40*a*—47*b*.

Same work as that described under R. No. 1447(*a*) *ante*.

Complete.

---

R. No. **1451.**

Palm-leaf. 17 × 1 inches. Foll. 47. Lines, 5 in a page. Nandināgarī. Slightly injured.

Purchased in 1914–15 from M.R.Ry. Sinnanna Śāstrigaḷ of Rāmēśvaram.

(*a*) मणिमञ्जरीव्याख्यानम्.

MAṆIMAÑJARĪVYĀKHYĀNAM.

Foll. 1*a*—39*b*.

A commentary by Viṭṭhalācārya on the Maṇimañjarī of Nārāyaṇapaṇḍitācārya. Similar to the work described under R. No. 1083 *ante*.

Complete.

**Beginning :**

मणिमञ्जर्यास्सद्व्याख्यानं कर्तुकामः आदौ भगवन्तं प्रणमति । आनन्दज्ञानदेहम् । आनन्दश्च ज्ञानं च . . ते एव देहो यस्य तथा तम् । श्रियः पतिम् श्रियः लक्ष्म्याः पतिं भर्तारम् । श्रीमदानन्दतीर्थार्यवल्लभम् । श्रीरस्यास्तीति श्रीमान् । आनन्दसन्दायि सुशास्त्रकर्तृत्वादानन्दतीर्थः श्रीमांश्चासावानन्दतीर्थश्चेति श्रीमदानन्दतीर्थः स चासावाचार्यश्चेति तथा तस्य वल्लभं स्वामिनं परं सर्वोत्तमं चतुर्विधनाशरहितम् गोविन्दं वेदप्रतिपाद्यं श्रीनारायणम् । अहमित्यध्याहारः अहं वन्दे वदि अभिवादनस्तुत्योः लडात्मनेपदम् ।

**End:**

नारायणार्योद्भवः, त्रिविक्रमपण्डिताचार्यसूनुना नारायणपण्डिताचार्येण उद्भवो निर्माणं यस्य सः तथा मध्वविजयः। मध्वविजयाख्यकाव्यः व्यद्योतिष्ट बभौ वीत्युपसर्गः व्यद्योतिष्ट द्युतदीप्तौ कर्तरि लुङात्मनेपदि। वृत्तम्। नि— चरित्रे त्रिष्वतीते दृढनिश्चिते। खनिः स्त्रियामाकरे स्यात् अर्थोऽभिधेयो रैवस्तु- प्रयोजननिवृत्तिष्वित्यमरः। नराव्दभेदे स्त्रीवृत्ते ललितं त्रिषु सुन्दरे इति शब्दार्णवे।

श्रीमदानन्दतीर्थार्यहृदयाम्भोजमन्दिरः।
कमलाश्लेषरसिकः प्रीयतां नः परः पुमान्॥

**Colophon:**

इति श्रीमदानन्दभगवत्पादचरणनलिनसेव्योपजीविश्रीत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचि[।]मणिमञ्जरीव्याख्याने विट्ठल- कृते अष्टमस्सर्गः॥

The scribe adds—

वर्षे विजयचैत्रे च पूर्वपक्षे चतुर्थके।
रामसेतौ च लिखितं प्रीत्यै माधवमध्वयोः॥

---

(*b*) शिवस्तुतिव्याख्या.
ŚIVASTUTIVYĀKHYĀ.

Foll. 40*a*—45*b*.

A commentary by Mahēśācārya on the Śivastuti, which is a eulogy on God Śiva: by Nārāyaṇapaṇḍitācārya, son of Trivikramapaṇḍitācārya.

**Beginning:**

वन्दे लक्ष्मीनृसिंहस्य चरणाम्बुरुहद्वयम्।
(नाभी)कमलाशम्भु(सम्भूत)शर्वेन्द्रादिसुरार्चितम्॥

इह खलु श्रीमदानन्दतीर्थाचार्यस्य श्रीपादनलिने भृङ्गायमाणः दुर्वादि-

द्विरदकुम्भस्थलदलने सिंहायमानः लिकुचकुलतिलकः त्रिविक्रमपण्डिताचार्य-[सुधी]सूरिसुतः श्रीमन्नारायणपण्डिताचार्यवर्यः सज्जनाननुजिघृक्षुः श्रीमन्महा-रुद्रप्रसादमभीप्समानस्सन् इन्द्रादिसुरैः वन्दितपादारविन्दस्य पार्वतीपतेः स्तुतिं करोति स्फुटेति ।

स्फुटस्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदा नु शितिकण्ठ ते वपुरवेक्षते चेक्षणम् ॥

**End:**

कुरुतादित्यनेन हेतुना न तु प्रयोजनान्तरोद्देशेन निमित्तेन प्रथिते मानसे प्रसिद्धबुद्धिर्लिकुचतिलकसूरिसूनुः लिकुचसूरिः त्रिविक्रमपण्डिता-चार्यः तस्य सूनुः नारायणभट्टाख्यः सुधीः विद्वान् इमां शुभां शिव-स्तुतिं शिवस्य श्रीमहादेवस्य स्तुतिं स्तोत्रम् व्यधित कृतवान् । इति प्रसिद्धः ॥

शिवस्तुतेरियं व्याख्या महेशाचार्यसूरिणा ।
तयोरनुग्रहे प्रीत्यै मया भक्त्या यथामति ॥

**Colophon:**

इति श्रीमत्कविकुलतिलक श्रीमत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायण-पण्डिताचार्यविरचित[ा]शिवस्तुतिव्याख्या संपूर्णा ॥

---

(c) ब्रह्मसूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः.

BRAHMASŪTRĀDHIKARAṆASAṄKHYĀNIRṆAYA-SAṄGRAHAḤ.

Foll. 46a—47a. Fol 47b is left blank.

Gives the number of Sūtras and Adhikaraṇas contained in each of the Pādas of the various Adhyāyas of the Brahmasūtra. By Ahōmaṭha, a disciple of Ahōbala and the son of the latter's elder brother.

Complete.

**Beginning:**

अहोबलार्यशिष्येण तदग्रजसुतेन च ।
अहोमठाभिधानेन सत्कृपाविषयेण च ॥
ब्रह्मसूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः ।
लोकसङ्केतितैर्वर्णैः क्रियते मतिशुद्धये ॥
बाणर्तुवेदसङ्ख्यानि ब्रह्मसूत्राणि वेदराट् ।
चकार चक्षुर्नेत्राक्षिसङ्ख्याधिकरणान्यपि ॥

**End:**

एतद्गतं चाधिकरणं वसुमङ्ख्यामचीक्लृपत ॥
चतुर्थस्य द्वितीयाङ्घ्रिसूत्रं चक्षुर्विलोचनम् ।
तद्गतं चाधिकरणं विश्वेदेवोपमं स्मृतम् ।
चतुर्थस्य तृती॰ाङ्घ्रिसूत्रं च स्वरसङ्ख्यकम् ।
तद्गतं चाधिकरणमृतुसङ्ख्यमुदाहृतम् ॥
चतुर्थस्य चतुर्थाङ्घ्रिसूत्रं लोचनवाह्निगम् ।
तद्गतं चाधिकरणं रुद्रसङ्ख्यं व्यधाद्धरिः ॥
इति सूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः ।
नित्यं पारायणार्थं च कृतस्समभिसिद्धये ॥

**Colophon:**

इति । श्लोकाः २४ ॥ इति श्रीचतुर्थाध्यायः समाप्तः ॥

---

R. No. **1452**.

Palm-leaf. 10¼ × 1¼ inches. Foll. 187. Lines, 8 in a page. Nandināgarī. Good.

Purchased in 1914-15 from M.R.Ry. Śinnaṇṇā Śāstrigal of Rāmēśvaram.

(*a*) केशवादिचतुर्विंशतिनामस्तोत्रम्.

KĒŚAVĀDICATURVIṀŚATINĀMASTŌTRAM.

Foll. 1*a*—3*a*.

Similar to the work described under No. 8922 of the D.C.S. MSS., Vol. XVII.

Complete.

**Beginning:**

केशवस्तु सुवर्णाभः संयुतश्च श्रिया सदा ।
शङ्खचक्रगदापद्मधरो ध्येयोऽखिलैर्जनैः ॥
नारायणः श्यामवर्णस्सदा लक्ष्म्या युतः प्रभुः ।
पद्मगदाचक्रशङ्खधरो ध्येयोऽखिलैर्जनैः ॥

**End:**

कृष्णो भिन्नाञ्जनप्रख्यः लक्ष्मणास्यप्रियायुतः ।
गदापद्मचक्रशङ्खधरो ध्येयोऽखिलैर्जनैः ॥

Fol. 3*b* contains a few lines of Hanumanmantradhyāna. Foll. 4*a* to 7*a* contain a few sentences of Ēkādaśīdvādaśī-nirṇayaprakāra of Vijayēndratīrtha. Fol. 7*b* is left blank. Foll. 8 and 9 contain a few lines of the Śāntipāṭha of Ānandatīrtha's Brahmasūtrabhāṣya. Fol. 10 contains a few stanzas of Kēśavādicaturviṁśatināmabhāryāvarṇanirūpaṇa and Daśāvatārabhāryāvarṇananirūpaṇa

---

(*b*) ब्रह्मसूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः.

BRAHMASŪTRĀDHIKARAṆASAṄKHYĀNIRṆAYA-SAṄGRAHAḤ.

Foll. 11*a*—12*b*.

Same work as that described under R. No. 1451(*c*) *ante*.

Complete.

Fol. 13 contains a few stanzas of Brahmasūtrādhikaraṇapādasaṅkhyānirūpaṇa.

---

(*c*) ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Foll. 14*a*—133*b*.

Same work as that described under No. 4810 of the D.C.S. MSS., Vol. X, but the additional stanzas in the beginning are given below.

Complete.

**Beginning:**

नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि तत्र सूत्रार्थ उच्यते ॥

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरार्चितो भगवान् नारायणो व्यासत्वेनावततार ॥

* * * *

निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः ।
यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥

---

(*d*) ग्रन्थमालिकास्तोत्रम्.

GRANTHAMĀLIKĀSTOTRAM.

Foll. 134*a*—135*a*.

Gives in verse the names of the thirty-seven works written by Madhvācārya or Ānandatīrtha.

Complete.

**Beginning** and **End**:

कृष्णं विद्यापतिं नत्वा पूर्णबोधार्यसद्गुरून् ।
ग्रन्थान् वक्ष्ये नन्दतीर्थमुखाम्बुजविनिस्सृतान् ॥
ग्रन्थान् मध्वश्चकारासौ सप्तत्रिंशदमन्दधीः ।
गीताभाष्यं चकारादौ प्रथमं तुष्टिदं हरेः ॥
भाष्याणुभाष्ये चक्रेऽथ अनुव्याख्यानमेव च ।
प्रमाणलक्षणं नाम कथालक्षणमेव च ॥
उपाधिखण्डनं चक्रे मायावादस्य खण्डनम् ।
चक्रे प्रपञ्चमिथ्यात्वमानखण्डनमत्र हि ॥
चकार तत्त्वसङ्ख्यानं साधनं विष्णुदर्शने ।
ग्रन्थं तत्त्वविवेकाख्यं तत्त्वोद्योतं हरेः प्रियम् ॥
कर्मनिर्णयनामानं ग्रन्थं न्यायार्थबृंहितम् ।

सुखतीर्थयतिश्चक्रे विष्णुतत्त्वविनिर्णयम् ॥

ऋग्भाष्यं च चकारासौ सर्ववेदविनिर्णयम् ।
ऐतरेयं तैत्तिरीयं बृहदारण्यमेव च ॥

ईशावास्यं काठकं च छान्दोग्याथर्वणं तथा ।
माण्डूक्यं नाम षट्प्रश्नं तथा तलवकारकम् ॥

चक्रे भाष्याणि दिव्यानि दशोपनिषदां गुरुः ।
निर्णयं सर्वशास्त्राणां गीतातात्पर्यसङ्गतिम् ॥

सन्न्यायविवृतिं चक्रे पापशास्त्रार्थकृन्तनीम् ।
नरसिंहनखस्तोत्रं चक्रे यमकभारतम् ॥

द्वादशस्तोत्रमकरोत्कृष्णामृतमहार्णवम् ।
तन्त्रसारं चकारासौ सदाचारस्मृतिं सुधीः ॥

श्रीमद्भागवतस्यापि तात्पर्यं ज्ञानसाधनम् ।
महाभारततात्पर्यनिर्णयं संशयाच्छिदम् ॥

यतिप्रणवकल्पं च प्रणवार्थप्रकाशनम् ।
जयन्तीनिर्णयं चक्रे देवकीगर्भजन्मनः ॥

कृष्णस्य कृष्णभक्तोऽयं द्वैपायनकराब्जभूः ।
एतेषां पाठमात्रेण मध्वेशः प्रीयतां हरिः ॥

**Colophon:**

इति श्रीग्रन्थमालिकास्तोत्रं संपूर्णम् ॥

Fol. 135*b* is left blank. Foll. 136 and 137 contain some miscellaneous stanzas realating to the Madhva religion.

R. No. **1453.**

Palm-leaf. 16¾ × 1¼ inches. Foll. 202. Lines, 8 in a page. Grantha and Tamil Much injured.

Presented in 1914-15 from M.R.Ry. S. Kṛṣṇamācāryar of Triplicane.

Fol 1 contains a few lines of Pūrvācāryastōtras.

(*a*) श्रीमुष्णनाथप्रार्थनाषोडशी.

ŚRĪMUṢṆANĀTHAPRĀRTHANĀṢOḌAŚĪ.

Foll. 2*a*—3*a*.

Same work as that described under No. 10538 of the D.C.S. MSS., Vol XVIII.

Incomplete.

Foll. 3*b*—5*b* contain the Bhōgirājavimśati, which is found included in the works attributed to Vēṅkaṭēśa. As the leaves are fragmentary no extracts are given.

---

(*b*) भक्तवैभवदीपिका.

BHAKTAVAIBHAVADĪPIKĀ.

Foll. 6*a*—9*b*.

This is a treatise giving details of the month, the year and the moon's position in the several constellations, etc., in regard to the time of birth of the several Āḻvārs: by Vēṅkaṭēśa, son of Vādibhikṛt.

Complete.

**Beginning :**

. . . . . . . . . . . परवादिभयङ्करम् ।
यत्कटाक्षलव: पुंसामलं सर्वार्थसिद्धये ॥
अस्मदाचार्यतत्तुल्य . . . . . . ।
. . . . . . . . . प्रोक्तानपि वदाम्यहम् ॥
सरोमुनिर्भूतमुनिर्महदाह्वययोगिराट् ।
भक्तिसार: शठाराति: कुलशेखरसंयमी ॥

. . . . . . . . . . . . . . . . . . . . । 
भट्टनाथ (भक्ताङ्घ्रि)रेणुश्च मुनिवाहन . . . . ॥
. . . . . मुनिरित्येते क्रमेणोक्तेन जज्ञिरे ।
जन्ममासान्तथैतेषां तारकाश्च ब्रवीम्यहम् ॥

**End:**

मङ्गलं श्रीनिवासाय तद्भिभृत्योश्च मङ्गलम् ॥
वादिभीकृत्सुतेनेयं वेङ्कटेशेन निर्मिता ।
उररीक्रियतां सद्भिः भक्तवैभवदीपिका ॥

---

(c) शारीरकप्रदीपिका.
ŚĀRĪRAKAPRADĪPIKĀ.

Foll. 10*a*—20*b*.

A eulogy on Viṣṇu worshipped under the name of Bhūvaraha in the sacred shrine at Śrīmuṣṇam. The meaning conveyed by the various Adhikaraṇas of the Brahmasūtras are incidentally explained in order in this eulogy. By Vēṅkaṭēśa, son of Prativādibhayaṅkarārya of Śrīvatsagōtra. In the beginning the author salutes his father, Varayōgin, Vēdāntācārya, under whom, he says, he studied the Brahmasūtras, and Yatirāja.

Complete.

**Beginning:**

वन्दे वत्सान्वयाकल्पं वादिभीतिकरं गुरुम् ।
वरणीयगुणावासं वरयोगिनमाश्रये ॥
भजामि वेदशीर्षार्यं भजतामभयप्रदम् ।
शारीरकान्वयो यस्य प्रसादेन ममाप्यभूत् ॥
भवसागरसन्तारो भविनां सुलभो भवेत् ।
भाष्यपोतेन यस्याहं भजे तं यतिभूभृतम् ॥
सूत्राधिकारचरणलक्षणैर्भाष्यकल्पकम् ।
दलसूनोपविटपशाखाढ्यं फलदं भजे ॥

योगाधिकारविषयश्रुत्यर्थालोचनात्मकम् ।
शारीरकप्रदीपाख्यं स्तोत्रमाकल्याम्यहम् ॥

श्रीमुष्णनिलयः श्रीमानादिपोत्री जगत्पतिः ।
शारीरकप्रदीपेन स्तूयते शक्तितो मया ॥

नापि शक्यं परं स्तोतुं शारीरकविनिर्णयः ।
इति चेन्न यतीशाय कृपया शकनं भवेत् ॥

पूर्वोत्तरात्मकैर्वेदैर्वेद्याय व्यवधानकः ।
साक्षाच्च कर्माराध्याय वराहाय नमो नमः ॥

* * * *

जिज्ञास्यब्रह्मणे सिद्धे व्युत्पन्नैर्वाक्यसंचयैः ।
वेदान्तगैर्बोधिताय जगज्जन्मादिहेतवे ॥

जननं जीवनं यस्मात् लयो मुक्तिश्च जायते ।
जगतः प्रतिपन्नाय तन्निदानत्वलक्षणात् ॥

अनन्यमानसिद्धाय नमस्ताच्छास्त्रयोनये ।
अभिधेयतया सम्यगन्विताय फलत्वतः ॥

End:

मुक्तैश्वर्यं यदायत्तं यदि तद्ब्रह्मस्य पोत्रिणः ।
स्वतन्त्रत्वेन सङ्कल्पात् तस्यावृत्तिः पुनर्भवेत् ॥

इति चेदुत्तरं तत्रानावृत्तिरिति सूत्रतः ।
दीयते हि यथा हेयप्रत्यनीकः परः पुमान् ॥

जगज्जन्मस्थितिध्वंसकारणं मङ्गलास्पदम् ।
सर्वज्ञस्सत्यसङ्कल्पः श्रितवात्सल्यवारिधिः ॥
समस्तवस्तुव्यावृत्तः परकारुण्यसिन्धुराट् ।

निस्समाभ्यधिकोऽस्तीति शब्दादेवावगम्यते ॥
तथोपासनधीप्रीतोऽनाद्यविद्यां निवर्त्य च ।
कर्मरूपामुपासीनां निजानुभवजां मुदम् ॥

प्रापय्य नावर्तयति पुनरित्यपिशब्दतः ।
निश्चीयते हि शब्दश्च स खल्वित्यादिकस्तथा ॥

मामुपेत्य पुनर्जन्मेत्यादिनाभिहितं स्वयम् ।
येन कृष्णस्वरूपेण नापि स्युच्छिन्नकर्मणः ॥

असङ्कुचितसंवित्तेर्यत्प्रियस्यान्यवाञ्छया ।
ब्रह्मानुभवतोऽनन्तातिशयानन्दमादरात् ॥

पुनरावृत्तिशङ्का स्यान्न परः पुरुषोऽप्यमुम् ।
सत्यसङ्कल्पिनोऽत्यर्थप्रियमावर्तयिष्यति ॥

कदाचित् ज्ञानिनं लब्ध्वा यः प्राहैवं वचः शुभम् ।
प्रियो हि ज्ञानिनोऽत्यर्थं स महात्मा सुदुर्लभः ॥
इत्याद्यन्तमतस्सर्वं समञ्जसमितीरितम् ।
भाष्ये शारीरकार्थानां दर्पणे यतिभूभृता ॥
स मुष्णनगरीशानो वराहो वसुधाधरः ।
जगन्ति रक्षन् सर्वाणि भासतां शाश्वतीस्समाः ॥
मुष्णे वराहं धवलं मुष्णन्तं पापसञ्चयान् ।
पुण्यांश्च मङ्गलं पुंसां पश्येम शरदश्शतम् ॥

* * * *

मङ्गलं मुष्णनाथाय मङ्गलं कमलाभृते ।
मङ्गलं धवलायादिवराहायास्तु मङ्गलम् ॥

वेङ्कटेशेन वादीन्द्रभीकृद्देशिकसूनुना ।
शारीरकप्रदीपोऽयं रचितस्सद्भिरीक्ष्यताम् ॥

(d) अञ्जनशैलनाथस्तोत्रम्.

AÑJANAŚAILANĀTHASTŌTRAM.

Fol. 21.

By Prativādibhayaṅkara. Same work as that described under No. 9819 of the D.C.S. MSS., Vol. XVIII, but the additional stanzas found in the beginning and end respectively are given below.

**Beginning:**

वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयङ्करार्यम् ॥

**End:**

वादिभीतिकरार्येण रचिता भावबन्धनैः ।
शोभते वेङ्कटाद्रीशविषया स्तुतिरद्भुता ॥

---

(e) वेङ्कटेशस्तोत्रम्.

VĒṄKAṬĒŚASTŌTRAM

Foll. 21b—22a.

A eulogy on God Vēṅkaṭēśa, a form of Viṣṇu, worshipped in the sacred hills at Tirupati: by Prativādibhayaṅkarārya, who mentions Saumyajāmātṛmuni.

Complete.

**Beginning:**

सेवे वेङ्कटनाथं सेव्यगुणाधारम् ।
देवेशं दनुजरिपुं देवशिरोरत्नम् ॥
प्राचीनं परमधनं प्रणिपतता लभ्यम् ।
प्राचीने वचसि परं ब्रह्म समाम्नातम् ॥
प्राचीनाचार्यवरैः प्राप्यजयावगतम् ।
वीचीनाममृतभुवां विजयपरालोकम् ॥
कारुण्यामृतजलधिं कमपि महापुरुषम् ।

**End:**

वन्दारुत्रिदशवरावनतशिरो(यु)क्तं
मन्दारद्रुमकुसुमैर्महितपदाम्भोजम् ।

सौन्दर्यामृतसरिता सकलदशां सुखदं
सुन्दरजामातृमुनेश्शुभतरमन्दारम् ॥
वादिभीतिकराचार्यरचितं वेङ्कटेशितुः ।
स्तोत्रं पठति यस्तस्य नित्यं तत्सेवनं भवेत् ॥

---

(*f*) वेङ्कटेशविजयस्तोत्रम्.

VEṄKAṬĒŚAVIJAYASTŌTRAM.

Foll. 22*a*—23*a*.

Similar to the above; each stanza ends with the expression **विजयी भव,** the meaning of which is 'may you be victorious.' By the same author as that of the last.

Complete.

**Beginning:**

दैवतदैवत मङ्गल (मङ्गल) पावनपावन कारणकारण ।
वेङ्कटभूधरमौलिविभूषण माधव भूधव देव जयी भव ॥
वारि . . . . . . दयाकर शारदनीरजचारुविलोचन ।
देवशिरोमणिपादसरोरुह वेङ्कटशैलपते विजयी भव ॥

**End:**

काननवानरवीरवनेचरकुञ्जरसिंहमृगादिषु वत्सल ।
सूरिनिरस्तभवादर वेङ्कटशैलपते विजयी भव ॥
वादिसाध्वसकृत्सूरिकथितं स्तवनं महत् ।
वृषशैलपतेः श्रेयस्कामो नित्यं पठेत्सुधीः ॥

---

(*g*) वृषाद्रिनाथसप्तविभक्तिः.

VṚṢĀDRINĀTHASAPTAVIBHAKTIḤ.

Fol. 23.

Similar to the above. The stanzas are composed in the Ārya metre. By the same author as that of the last.

The name and attributes of God Veṅkaṭēśa are used in the seven de-lensional cases in order in the seven stanzas of this work.

Complete.

**Beginning:**

श्रीवेङ्कटाद्रिधामा भूमा भूमाप्रियः कृपासीमा ।
निरवधिकनित्यमहिमा भवतु जयी प्रणतदर्शितप्रेमा ॥
ज . . . . जनविमलीकृतिसफलीकृतसकलमङ्गलाकार ।
विजयी भव विजयी भव विजयी भव वेङ्कटाचलाधीश ॥

**End:**

लक्ष्मीललितपदाम्बुजलाक्षारसरञ्जितायतोरस्क(स्के) ।
श्रीवेङ्कटाद्रिनाथे नाथे मम नित्यमर्पितो भारः ॥
आर्यावृत्तसमेता सप्तविभक्तिर्वृषाद्रिनाथस्य ।
वादीन्द्रभीकृदाख्यैरार्यैं रचिता जयत्वियं सततम् ॥

---

(h) वृषाद्रिनाथस्तोत्रम्.

VṚṢĀDRINĀTHASTŌTRM.

Foll. 23b—24a.

Same work as that described under No. 10389 of the D.C.S. MSS., Vol. XVIII. The author's name is given to be Paravādibhayaṅkarārya in the additional stanzas found at the end and extracted below.

Complete.

**End:**

सुमुखं सुखदं सुलभं सुहृदं सुजनं च सुजायममोघशरम् ।
अपहाय रघूद्वहमन्यमहं न कथञ्चन (कंचन) जातु भजे ॥
रचितं गुरुणा परवादिभयंकरनामभृता स्तवनं महितम् ।
वृषशैलपतेस्सततं पठतः करपद्मगता परमुक्तिरहो ॥

---

(i) फणीन्द्रगिरिस्तोत्रम्.

PHANĪNDRAGIRISTŌTRAM

Fol. 24.

Similar to the above. By the same author as that of the last.

It is stated herein that he who learns this eulogy becomes skilled in poetics.

Complete

**Beginning:**

अस्ति श्रीमानवनितिलको वेङ्कटो नाम शैलः
भूयानेको भुवि परिणतः पुण्यराशिः प्रजानाम् ।
सारोद्धारस्सकल . . . . . स्थापितः कापि धात्रा
यस्मिन् साक्षात्परमपुरुषो दीव्यति श्रीसखायः ॥
सौवर्णात्मा मरकतमयैर्वज्रवैडूर्यरूपैः
नीलोत्की(र्ण)स्फटिकघटितैः पद्मरागप्रणीतैः ।
नानारत्नाकृतिभिरखिलैस्सानुभिरसंभृतश्रीः
सर्वैस्सोऽयं सुरगिरिरिति प्रत्यभिज्ञायते यः ॥

**End:**

क्रूरास्सिंहाः कुपितशरभाः कुञ्जरेन्द्रा मदान्धाः
घोरा व्याघ्राः कटुककिटयो भीमभल्लूकसङ्घाः ।
सर्वे चान्ये सहजरिपवो जन्तवो यत्र वा(सात्)
संगाहन्ते प्रशमितरुषस्स्वैरमेकोदपाने ॥
श्रीमद्वादिप्रवरभयकृद्देशिकोक्तं फणीन्द्र-
क्ष्माभृत्स्तोत्रं भुवनमहितं शब्दतोऽर्थाच्च साधु ।
श्रुत्वा श्री . . . . . . काव्यनाट्यादिदक्षा
नैतत्तुल्यं भवति भवति स्मापि यावद्धरित्र्याम् ।—

---

(*f*) लक्ष्मीस्तोत्रम्.

LAKṢMĪSTOTRAM.

Foll. 24*b*—31*b*.

A eulogy on the goddess Lakṣmī conceived as the consort of God Śrīnivāsa. The author speaks of Saumyajāmātṛmuni as a Guru.

Complete.

**Beginning :**

श्रियं श्रीवेङ्कटेशस्य श्रीनिवासस्य वल्लभाम् ।
ईश्वरीं सर्वभूतानामाश्रये विश्वमातरम् ॥
विष्णोर्विचित्रचिदचिन्मिश्रविश्वविधिश्रमः ।
सफलस्सकृदालोकाद्यस्यास्तस्यै नमः श्रियै ॥

**End :**

सौम्योपयन्तृमुनिमात्मविदं समीक्ष्य
मातः प्रसीद मम वृत्तमचिन्तयित्वा ॥
देव्या मदीयरसनाथ(र्थे)नया श्रियैव
स्वप्रीतये स्तुतिमिमामुदितां गृणन्तः ।
भुक्त्वा समृद्धिमिह सद्भिरनन्यभोगै-
रन्ते च सूरिपरिषत्प्रथमा भवन्ति ॥

---

(*k*) पराङ्कुशपञ्चविंशतिः.

**PARĀṄKUŚAPAÑCAVIṀŚATIḤ.**

Foll. 32a—33a.

By Varadadeśika, a disciple of Veṅkaṭapati, son of Varadārya of Vadhūla family. Same work as that described under R. No. 173(*m*) *ante*.

Complete.

The last stanza runs as follows :—

वाधूलवेङ्कटपतिं वरदार्यसूनुमस्मद्गुरुं तव पदप्रवणं समीक्ष्य ।
अज्ञं कृतागसमनाथमकिंचनं मां त्वत्किङ्करं शठरिपो सततं कुरुष्व ॥

Fol. 33 contains four Citra and Bandha stanzas, the first two relating to the story of Kṛṣṇa and the last two eulogizing the holy sandals of God Raṅganātha (probably taken from the Pādukāsahasra of Vedāntadeśika).

(i) श्रीवचनभूषणसारः.
ŚRIVACANABHŪṢAṆASĀRAḤ.

Foll. 34*a*—48*a*.

This work purports to give the substance of the Śrivacanabhūṣaṇa of Piḷḷailōkācārya. By Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Wants beginning.

**Beginning:**

. . . . . नवेत्यपि काचियोजनास्ति। तत्प्रतिपादिका काचन गाथा च श्रीवचनभूषणानुसन्धानारम्भात् पूर्वमनुसन्धीयमाना द्रष्टव्या। ननु कोडीकारेण षडर्थार्थो इत्युक्तम्। इतरौ(रे)सर्वेऽपि एतदुपयुक्ता इत्यप्युक्तम्। पृथक् पृथगुपादाने अशेषाणामर्थानामुपादानं कर्तव्यम्। तद्भिन्नोक्तार्थेभ्यः पुनरप्यर्थत्रयमादाय नवार्था इति काचन योजना कथमिति चेत्। समीचीनोऽसि.

* * * *

अनभिज्ञो भवान् वरवरमुनिवैभवस्य। वरवरमुनिस्तावत् लोकाचार्यशिष्यसौम्यजामातृगुरोः जामातुः दीप्रशयानादवततार। लोकाचार्यान्तेवासिनं कूरकुलोत्तमदासशिक्षितस्वरूपं श्रीशैलनाथदेशिकं समाश्रयते स्म। दीप्रशयानसौम्यवरावपि एतस्यार्थविशेषपरिज्ञापनोपकारकौ।

**End:**

तस्माच्चरमपर्वनिष्ठो मुमुक्षुः यावच्छरीरपातं दिव्यदेशेष्वेव वसन् श्रीवचनभूषणार्थविश्वासशाली तदुक्तानुष्ठानतत्परो भगवत्प्राप्तौ निस्संशयो निर्भरो निर्भयस्सुखमासीत।

वेङ्कटेशेन वादीन्द्रभयङ्करसूनुना कृता।
श्री(वाग्)भूष(ण)सारोऽ(यं सन्तनोतु सतां) मुदम्॥

(m) भगवदाराधनक्रमकारिका.

BHAGAVADĀRĀDHANAKRAMAKĀRIKĀ.

Foll. 48b—50b.

Similar to the work described under No. 8659 of the D.C.S. MSS., Vol. XVI. By Vēṅkaṭēśa, son of Prativādibhayaṅkara. The author says he has given in verse what has been laid down by Maṇavālamāmuni regarding the conduct of worship of the divine images.

Complete.

**Beginning:**

उषस्युत्थाय दन्तानां धावनं स्नपनं ततः ।
नित्यानि सर्वकर्माणि कृत्वा पादकरावपि ॥
प्रक्षाल्याचम्य पुण्ड्रांश्च धृत्वा द्वादश सन्निधिम् ।
गत्वार्घ्यपाद्ये मन्त्रेशद्वयमप्यन्ततोऽन्तिमम् ॥
अनुसन्धाय लक्ष्मीशं नत्वा प्रबोधकं वचः ।
गोदोक्तिं चानुसन्धाय गीते वर्षादिके ततः ॥
अररोद्घाटनं कृत्वा पुरस्कृत्य स्वदेशिकम् ।
हरिं प्रणम्य शेषं च सूक्तैर्मङ्गलरूपिणीन् ॥

**End:**

पुरस्कृत्य हरिं नत्वा नित्यश्रीर्व्याहरन्निति ।
भूयो मङ्गलसूक्तेन मङ्गलाशासनं चरेत् ॥
श्रीरम्यवरयोगीन्द्रप्रोक्तमाराधनक्रमम् ।
अकरोच्छ्लोकरूपेण वादिभीतिकरात्मजः ॥

---

(n) वेदान्तदेशिकशतकम्.

VĒDĀNTADĒŚIKAŚATAKAM.

Foll. 50b—56a.

A centum of stanzas in praise of Vēdāntadēśika: by Vēṅkaṭēśa, son and disciple of Prativādibhayaṅkara. The date in the cyclic era is given in regard to the completion of this work.

Complete.

**Beginning:**

श्रीमद्वेणुक्वणनजनितानन्दगोपाम्बुजाक्षी-
दृक्पीताङ्गच्छवितरुणतासौकुमार्याब्धिपूरम् ।
आगच्छन्तं हृदि कलयते यत्र संपूर्य वीथी
जीयान्नित्यं भुवनविदितो वेदचूडार्यवर्यः ॥

श्रियं सवित्री जगतो मुरारेः प्रियां प्रणम्यावनवद्यदीक्षाम् ।
प्रपद्य धन्यं शरणं शरण्यां वेदान्तसूरिं शरणं प्रपद्ये ॥

**End:**

वेदान्तसूरिशतकं विविधैर्हि वृत्तैः
चित्रं च तस्य गुरुपङ्क्तिषु भक्तिवृद्धिम् ।
चर्या दिनेऽपि वपुषोऽपि विलक्षणत्वं
सम्यक् प्रकाशयदिदं धरणौ समिन्धे ॥
श्रीवेङ्कटेशकविना परवादिभीकृ-
द्दासेन वेदशिखरार्यवराबन्धम् ।
उक्तं पठन्ति भुवि ये सकलं शुभन्तत्
हस्तस्थितं तदनु मुक्तिरपीदृशी स्यात् ॥

**Colophon:**

शुभकृति शशिवारे वत्सरेऽर्के सकन्ये
धवलिमयुजि पक्षे पर्वतः पूर्वतिथ्याम् ।
शतकमुदितमेतद्वेङ्कटेशेन तुष्टै
निगमशिखरसूरेः पूरणं प्रापदर्थ्यम् ॥

---

(e) वरवरमुनिविंशतिः.

VARAVARAMUNIVIMŚATIḤ.

Foll. 56a—57b.

Twenty stanzas in praise of Varavaramuni or Kāntōpayantṛmuni,* also well-known as Maṇavāḷamāmuni. The Śrī-Vaiṣṇava

religious teachers who are said to have been worshipped by Manavālamāmuni are given in the beginning. By a disciple of Prativādibhayaṅkara.

**Beginning:**

श्रीशाम्बुजाहरिचमूपतिकारिसूनुनाथाब्जलोचनरघूत्तमयामुनार्यान् ।
यस्सेवते तमखिलाश्रितपारिजातं वन्देय कान्तवरयोगिवरं महान्तम् ॥
पूर्णार्यलक्ष्मणमुनीश्वरकूरनाथगोविन्दभट्टगुरुवेदशिरोमुनीन्द्रान् ।
नित्यं भजन् भुवनदेशिकमप्युदग्रं कान्तोपयन्तृमुनिरस्तु गतिस्स्वयं नः ॥

**End:**

दासेन वादिभयकृद्गुरुपुङ्गवस्य प्रोक्तां मनोज्ञवरयोगिधुरन्धरस्य ।
यो विंशतिं कलयते मुनिरेष तस्मै दद्यात् स्वरूपसदृशीमखिलां समृद्धिम् ॥

---

(p) पराङ्कुशस्तोत्रम्.

PARĀṄKUŚASTŌTRAM.

Foll. 57b—58b.

A eulogy on Parāṅkuśa or Saint Śaṭhakōpa, well-known as Nammāḷvār.

Complete.

**Beginning:**

त्रय्यन्तदेशिकवरं प्रदलक्ष्मणार्यवानाद्रियोगिवरयोगिवरान् प्रपद्ये ।
श्रीशैलनाथसुरनायककोलपद्मनाभार्यमाधवगुरून् सह कृष्णयुग्मान् ॥
लोकार्यवेदशिखराह्वमुनीन्द्रभट्टगोविन्दकूरकुरुकेश्वरयोगिराजान् ।
मालाधरार्यगुरुपुङ्गवयामुनार्यरामाम्बुजाक्षगुरुनाथशठद्विषोऽपि ॥

**End:**

विमलात्मचित्तकमलावनीश्वरः शरणाक्षि(र्थि)नां च तरणाय संसृतेः ।
घटतां शठारिरटतां भवाम्बुधौ पुरवैरिखमुरवैरिसत्कथीः ॥
स विहाय सत्सु महसा पराङ्कुशं कुरुतादुदारगरुताहिविद्विषा ।
स्थितवप्रभाग्नि भवव्रजनेडितो विनतान् निरस्तघनतापसंसृतीन् ॥

सनकादिसेव्यघनकान्तिविग्रहे परभक्तिरीशशरभच्छिदि प्रभौ ।
द्विरदेश्वरासु(शु) वरदे पराङ्कुशं करुणागुणादिवरुणालयोऽवतात् ॥

---

(५) रामानुजनक्षत्रमाला.

RĀMĀNUJANAKṢATRAMĀLĀ.

Foll. 58b–60a.

Stanzas in praise of Rāmānuja: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya. The eulogy proper consists of twenty-seven stanzas containing respectively the names of the twenty-seven Nakṣatras or constellations in order.

Complete.

**Beginning:**

आनन्दहेतुं विश्वस्य ज्ञानज्योत्स्नं कलाश्रयम् ।
अलङ्करोमि योगीन्द्रचन्द्रं नक्षत्रमालया ॥
श्रीमान् रामानुजो जीयाद्यत्पादद्रविणोन्नताः ।
तिरस्कुर्वन्ति हर्यश्विनीरजागारसम्पदम् ॥

**End:**

अधःकृताप्यधीरेव तीव्रबुद्धिमतामपि ।
कुमतीनां ततिर्येन यतीशं नौमि सश्रियन् ॥

चेतो रामानुजं भजेति वा—

वाचिकं मम कैङ्कर्यं तारामालभिधावि(यु)तम् ।
प्रतिगृह्णातु कृपया लक्ष्मणार्यो यतीश्वरः ॥
वादिभीकरपुत्रस्य वेङ्कटेशकवेरियम् ।
कृतिर्नक्षत्रमालेति श्रुतो विजयतेतराम् ॥

---

(६) द्राविडाम्नायशतकम्.

DRĀVIḌĀMNĀYAŚATAKAM.

Foll. 60a–63b.

This is a summary in 100 stanzas of the Tamil work called Tiruvāymoḻi of Saint Śaṭhakōpa or Nammāḻvār who is also spoken of eulogistically in them. The Tamil work contains 1,102 stanzas divided into 10 sections called Pattus each of which is further sub-divided into sub-sections called Tiruvāymoḻis, each containing almost invariably 11 stanzas. The Sanskrit work summarizes one sub-section in one stanza and begins it with the same letter as the first letter of the Tamil sub-section. Further, each of the 100 stanzas ends with the same letter as the first letter of the next stanza. By Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning :**

द्राविडाम्नायदशकाद्यक्षरप्रतिमादिकैः ।
पद्यैः स्तौति शठारातिं तत्तात्पर्यप्रकाशकैः ॥

उत्तारकस्य जन्यब्धेः परत्वस्थापनाद्धरेः ।
चरणौ शरणं यामः शठारेर्विमलच्छवी ॥

वीतसङ्गास्तु सर्वत्र भजतेति जनान् प्रति ।
नारायणं शठारातिर्जगाद परमं तपः ॥

परभक्तिमतः श्रीशः सुलभोऽवददित्यपि ।

* * * *

ऐश्वर्यमस्थिरं यस्माद्भिक्षवो वसुधाधिपाः ।
पावनः कारिमूरैच्छत् बोनितं चरितं हरेः ॥

**End :**

वदन्तं कारिजं तत्र वासं मुक्तैश्च नौम्यमुम् ॥
मुनिः परमया भक्त्या विधिशम्भुतनुं हरिम् ।
स्वस्मादभिनिवेशाद्यं प्रापच्छठरिपुं गुरुम् ॥
द्राविडाम्नायशतकं योऽधीते भक्तिमान् सदा ।
तस्मिन् कृपा शठारातेः पूर्णा स्याद्भव्यदायिनी ॥

वादिभीकरसुतेनोक्तं वेङ्कटेशविपश्चिता ।
द्राविडाम्नायशतकमङ्गीकुर्वन्तु सज्जनाः ॥

**Colophon:**

द्राविडाम्नायशतकं समाप्तम् ॥

---

(s) कलिजित्पञ्चविंशतिस्तोत्रम्.

KALIJITPAÑCAVIMŚATISTŌTRAM.

Foll. 64a—66a.

Twenty-five stanzas in praise of Parakāla, also called Kaliripu or Tirumaṅgai Āḻvār: by Vēṅkaṭēśa, son of Vādibhītikarācārya.

Complete.

**Beginning:**

श्रीरङ्गराजकरुणासमवाप्तमूलमन्त्रं तदङ्घ्रिकमलद्वयसक्तचित्तम् ।
रङ्गस्थलोपवनमुख्यखिलस्थलेशगानप्रवीणमनिशं परकालमीडे ॥

श्रीरङ्गदिव्यनगरे जितबाह्यबौद्धजैनादिहेममणिबिम्बगणान् विधातुम् ।
यो वैदिकानिव जनाश्रयवप्रपाकशालादि नौमि विदधे तमहं कलिघ्नम् ॥

**End:**

विज्ञापन कलिरिपो यदिदं मदीयं तत्स्वीकुरुष्व नतवत्सलताम्बुराशे ।
वादीन्द्रभीकरगुरुं भवदङ्घ्रिभक्तं वीक्ष्य प्रसीद मम वृत्तमचिन्तयित्वा ॥

**Colophon:**

वादिभीतिकराचार्यतनयेनोररीक्रियात् ।
वेङ्कटेशेन रचितां कलिजित्पञ्चविंशतिम् ॥

Fol. 66a contains four stanzas giving the number of the section and of the stanzas in the Tiruvāymoḻi referring to Tulasī. Foll. 66b and 67a give the following list of works attributed apparently to Vēṅkaṭēśa, son of Prativādibhayaṅkarārya. Against the names are given the references to the number under which they are described in this Cataolgue or to the folio number in this MS. where they are found.

1. प्रार्थनाविंशतिः (षोडशी) R. No. 1453(a)
2. भोगिराजविंशतिः Foll. 1b—5b
3. शारीरकप्रदीपिका R. No. 1453(c)
4. भक्तवैभवदीपिका ,, (b)
5. मुकुन्दमालाव्याख्या.
6. श्रीवचनभूषणसारः ,, (l)
7. आराधनक्रमः ,, (m)
8. वेदान्ताचार्यशतकम् ,, (n)
9. वरवरमुनिविंशतिः ,, (o)
10. கட்டு குருபரம்பரை. Foll. 82a—84a.
11. नक्षत्रमाला R. No. 1453(q)
12. द्राविडाम्नायशतकम् ,, (r)
13. अभिनवसारसंग्रहः ,, (o-1)
14. वरदराजाष्टकव्याख्या ,, (t-1)
15. परकालपञ्चविंशतिः ,, (s)
16. திருக்கண்ணமங்கைமங்களாசாஸனம் R. No. 1453(t)
17. मङ्गलगिरिप्रपत्तिः ,, (k- )
18. मङ्गलगिरिमङ्गलाशासनम् R. No. 1453(u)
19. मन्नार्प्रपत्तिः ,, (w)
20. मन्नार्मङ्गलाशासनम् ,, (v)
21. திருச்சித்ரகூடப்ரபத்தி ,, (y)
22. திருச்சித்ரகூடமங்களாசாஸனம். R. No. 1453(x)
23. கோமளவல்லியார் ப்ரபத்தி. R. No. 1453(z)
24. கோமளவல்லியார் மங்களாசாஸனம். R. No. 1453(a-1)
25. திருக்காவை வழுதியன் ப்ரபத்தி.
26. திருக்காவை வழுதியன் மங்களாசாஸனம். R. No. 1453(d-1)
27. श्रीमुष्णप्रपत्तिः.
28. श्रीमुष्णमङ्गलाशासनम्.
29. चूर्णिका; (திருப்பள்ளி எழுச்சி.) (b-1)
30. திருக்கடிகை மங்களாசாஸனம். R. No. 1453(n-1)
31. पुरुषोत्तमप्रपत्तिः.
32. पुरुषोत्तममङ्गलाशासनम्.
33. यामुनाचार्यपञ्चविंशतिः R. No. 1453(e-1)
34. शठारिस्तवः ,, (f-1)
35. रामसंबोधनस्तोत्रम् ,, (g-1)
36. परकालशतकम् ,, (i-1)
37. नागपुरशतकम् ,, (j-1)
38. वत्सरावलि ,, (m-1)
39. अङ्गाङ्गिभावसमर्थनम्.
40. சம்பாரக வைப்ரவைப்ரகம்.
41. ஆழ்வான வாழுவிஸாத்தி. R. No. 1453(p-1)

42. भुजङ्गप्रयातस्तुतिः
R. No. 1453(g-1)

43. வண்ணாரகுப்பதம்.

44. प्रमेयशेखरम् R. No. 1453(s-1)

45. पादुकासहस्रश्लोकव्याख्या
Fol. 94.

46. गुरुपरम्पराविषययमकम्.

47. चतुरक्षरीश्लोकाः.

48. भक्तनाथमङ्गलाशासनम्
R. No. 1453(u-1)

49. भक्तामृतरामचरितामृतमैत्री
R. No. 1453(e-1)

50. नागपुरीगुणप्रकाशः „ (e-1)

51. दुष्टशिक्षा „ (s-1)

52. यतिपतिश्लोकव्याख्या „ (s-1)

53. अर्धभ्रमकश्लोकाः.

54. सर्वतोभद्रश्लोकाः
Foll. 174b—176a.

55. दशावतारस्तोत्रम्
R. No. 1453(s-2)

56. अष्टोत्तरशतस्थान(महिम)स्तुतिः.

57. செல்வப்பிள்ளை திருமஞ்சனமெழுகாப்புசாத்துக்கிரமம்.

58. यादवगिरिस्थनृसिंहमङ्गलम्.

59. செல்வப்பிள்ளை மங்களாசாஸனம்.
R. No. 1453(e-2)

60. यतिराजस्तवः.

61. [illegible]

62. चतुर्गतिप्रकारचिन्तनम्.

63. திருவிடவெந்தை மங்களாசாஸனம்.

64. संस्कृततत्त्वत्रयम्.

65. ब्रह्मविदन्तिमकालकृत्यप्रक्रिया.

66. பெரியாழ்வார் மங்களாசாஸனம்.

Fol. 67b contains four Bandha stanzas apparently from Pādukāsahasra, one of which is also commented upon. Fol. 68a contains some Stōtras of Vēdāntadēśika and God Sampatkumāra. Fol. 68b contains a few stanzas of Varavaramunyudbōdhana composed by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

---

(t) नागपुरीशमङ्गलाशासनम्.
NĀGAPURĪŚAMAṄGALĀŚĀSANAM.

Fol. 69a.

Benedictory stanzas in praise of Viṣṇu worshipped under the name Saundaryarāja in the sacred shrine at Tirunāgai or Negapatam (in the Tanjore district): apparently by Vēṅkaṭēśa.

Complete.

**Beginning:**

श्रीनागनगरीशाय सुन्दराय कलिद्विषे ।
सङ्गीतवैभवायास्तु रुक्माभाङ्गाय मङ्गलम् ॥
पुष्यन्मरतकज्योतिर्दीप्ताय श्रुतिदायिने ।
श्रीकुम्भकोणनगरे शयानायास्तु मङ्गलम् ॥
मणिमुक्ताविभूषाय चतुर्बाहाय सन्ततम् ।
धृतशङ्खरथाङ्गाय सुन्दराख्याय मङ्गलम् ॥

**End:**

हंसाय पोत्रिणे मत्स्यरूपाय जगदादये ।
आसीनाय स्थितिजुषे शयानायास्तु मङ्गलम् ॥
वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
श्रीमन्नागपुरीशाय सुन्दरायास्तु (मङ्गलम्) ॥

---

(u) मङ्गलगिरिनृसिंहमङ्गलाशासनम्.
MAṄGALAGIRINṚSIṀHAMAṄGALAŚĀSANAM.

Fol. 69a.

In praise of God Nṛsiṁha, a form of Viṣṇu, worshipped in the sacred shrine at Maṅgalagiri (in the Guntur district?): by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

श्रीमते जगतीसर्गरक्षणाप्ययकेलये ।
मङ्गलाचलनाथाय नरसिंहाय मङ्गलम् ॥
ज्वालकेशाय दंष्ट्राभ्यां भीषणायोग्रचक्षुषे ।
सर्वतोवदनायास्तु नर . . . . . . . ॥

**End:**

श्रीमते मङ्गलाभिख्यभूधराग्रनिवासिने ।
अभिरामाय सततं नर . . . . . . ॥
अवतीर्यास्तसमये रवेररिभुजान्तरम् ।
कठिनं बिन्दते भूयात् नर . . . . ॥

भक्तप्रतिज्ञासमये स्तम्भतो . . . . ॥
वादिभीतिकराचार्यमानसाब्जदिवाकृते ।
मङ्गलाचलनाथाय नरसिंहाय मङ्गलम् ॥

---

(७) चम्पकेशमङ्गलाशासनम्.

CAMPAKEŚAMAṄGALĀŚĀSANAM

Fol. 69b.

In praise of God Viṣṇu worshipped in the form of Kṛṣṇa in the sacred shrine at Campakāraṇya or Mannargudi (in the Tanjore district): by the same author as of the last.

Complete.

**Beginning:**

श्रीमते क्षीरपाथोधिशयनायोल्लुष्टभोगिने ।
वसुदेवात्मजायास्तु चम्पकेशाय मङ्गलम् ॥

**End:**

औदार्यप्रमुखैः पुंसां रूपेणापि गुणैरपि ।
दृष्टिचित्तहरायास्तु चम्पकेशाय मङ्गलम् ॥
वादिभीतिकराचार्यमानसाम्बुजभानवे ।
अस्मत्कुलधनायास्तु चम्पकेशाय मङ्गलम् ॥

---

(८) चम्पकेशप्रपत्तिः.

CAMPAKEŚAPRAPATTIḤ.

Foll. 69b and 70a.

Stanzas of self-surrender addressed to God Viṣṇu referred to under the last work: by the same author as of the last.

Complete.

**Beginning :**

लक्ष्मीश वत्सल सुशील ममेश्वशक्ति-
सौलभ्यधीमुखगुणाकर कृष्ण विष्णो ।
सौन्दर्यमुख्यगुणवारिविदिव्यरूप
श्रीचम्पकेश चरणौ शरणं प्रपद्ये ॥

**End :**

श्रीकृष्णपुष्करिणिकातटवासनाथ श्रीद्वारकाह्वयपुरस्य तु दक्षिणस्य ।
चाम्पेयकाननपते सरसीरुहाक्ष तौ तावकीनचरणौ शरणं प्रपद्ये ॥
भक्तचम्बुपूर्णपरवादिभयङ्करार्यचित्ताकळङ्कसलिलाशयराजहंस ।
सन्दर्शितौ मम च तेन कृपालयेन श्रीचम्पकेश चरणौ शरणं प्रपद्ये ॥

Here two stanzas are added which are in praise of Tirukkaṇṇamaṅgaiyāṇḍān and Tirukkurugaikāvalappan, respectively.

---

(x) तोयाद्रीशमङ्गलाशासनम्.

TŌYĀDRĪŚAMAṄGALĀŚĀSANAM.

Fol. 70a.

In praise of God Viṣṇu worshipped in the sacred shrine at Tōyādri or Tirunīrmalai, a place in the Chingleput district; apparently by the same author as of the last.

Complete.

**Beginning :**

श्रीयादवकुलं मग्नं मायातो यस्समुद्धरन् ।
जाया यस्य रमा तस्मै तोयाद्रीशाय मङ्गलम् ॥
दायादो यस्य कन्दर्पस्सायाह्नाभ्राम्बरो हि यः ।
कायाथवार्चितायास्मै तोयाद्रीशाय मङ्गलम् ॥

**End :**

वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
तोयाकरशयायास्तु तोयाद्रीशाय मङ्गलम् ॥

(ण) तोयाद्रिनाथप्रपत्तिः.

TŌYĀDRINĀTHAPRAPATTIḤ.

Foll. 70a and 70b.

Stanzas of self-surrender to God Viṣṇu referred to under the last work: apparently by the same author as of the last.

Complete.

**Beginning:**

मूर्धन्यभक्तिपरिपूर्णविरक्तिशालिकार्यद्धिजन्मशठनिद्विधुसेव्यमानौ ।
शौर्यप्रवेकमुखषड्गुणशोभमानवार्यद्रिनाथ चरणौ शरणं प्रपद्ये ॥

आराममात्रविसन्निभरूपबुद्धिसारावरात्मगणदेह जगन्निवास ।
धीराग्रगण्यकलिजिन्मुनिगीत तौ ते नीराद्रिनाथ चरणौ शरणं प्रपद्ये ॥

**End:**

भक्त्यम्बुपूर्णपरवादिभयङ्करार्यचित्ताकलङ्कसलिलाशयराजहंसौ ।
सन्दर्शितौ मम च तेन कृपालयेन नीराद्रिनाथ चरणौ शरणं प्रपद्ये ॥

---

(ञ) कोमलवल्लीप्रपत्तिः.

KŌMALAVALLĪPRAPATTIḤ.

Fol. 70b.

Stanzas of self-surrender to the goddess Kōmalavalli, a form of Lakṣmi, worshipped in the sacred shrine at Kumbakonam: by the same author as of the last.

Complete.

**Beginning:**

पद्मे जगज्जननि कोमलवल्लिनाम्नि श्रीकुम्भघोणनगरस्य ललामभूते ।
त्रैलोक्यरक्षिन(णि)मदार्तिभरापहन्त्री त्वत्पादपद्मयुगलं शरणं प्रपद्ये ॥

**End:**

यत्कारिसूनुमुखपूर्वतनार्यमौलिष्वम्भोरुहे दयितवक्षसि जातसाम्यम् ।
न्यासे च हेमनलिनीतटधाम्नि तच्छ्रीस्त्वत्पादपद्मयुगलं शरणं प्रपद्ये ॥

हे श्रीः कटाक्षलवसाधितधातृमुख्यभूते ह्यनृप्त्यमृतनायकि लोकमर्त्रि ।
वादीन्द्रभीतिकरदेशिकदर्शितं मे त्वत्पादपद्मयुगलं शरणं प्रपद्ये ॥

(a-1) कोमलवल्लीमङ्गलाशासनम्.

KŌMALAVALLĪMAṄGALĀŚĀSANAM.

Foll. 70b—71a.

Stanzas wishing prosperity to the goddess Lakṣmī referred to in the last work : apparently by the same author as of the last.

Complete.

**Beginning :**

जगत्सवित्र्यै शार्ङ्गेशपत्न्यै कोमलवीरुधे ।
मङ्गलाङ्ग्च्यै वयं नित्यं मङ्गलं प्रार्थयामहे ॥
निजैस्तारुण्यलावण्यसौन्दर्यप्रमुखैर्गुणैः ।
व्यामुग्धचित्तं शार्ङ्गेशं कुर्वन्त्यै मङ्गलं श्रिये ॥

**End :**

अपर्याप्तामृतेशस्य वल्लभे वल्लि कोमले ।
कुम्भघोणपुरीशाने मङ्गलानि भवन्तु ते ॥

Foll. 71a and 71b contain also a few stanzas eulogising Śrī-muṣṇa-Varāhasvāmin, Varavaramuni, Śaṭhāri, Kōmalavalli, etc.

---

(b-1) रङ्गनाथप्राबोधकस्तोत्रम्.

RAṄGANĀTHAPRĀBODHAKASTŌTRAM.

Fol. 72a.

Eulogistic stanzas addressed with a view to awaken God Raṅganātha from his bed and intended to be repeated in the early morning : by Veṅkaṭēśa, son of Prativādibhayaṅkarārya. This eulogy is a Sanskrit rendering of the Tamil work Tiruppaḷḷiyeḷucci of Toṇḍaraḍippoḍiyāḷvār.

Complete. Wants seven stanzas in the beginning.

**Beginning :**

* * * *

. . . सद्गुन्दरैरुपगता मुग्धाश्च विद्याधरैः
यक्षावृष्टकलेवराः पदजुषो रङ्गेश बोधं भज ॥

दूर्वां देयनिधिं सुराश्च कपिलामादर्शमङ्गोचिता-
नाकल्पानपि दर्शनोचिततरानादाय सद्योगिनः ॥
आयातास्सहतुम्बुरुस्सुरमुनिर्व्यक्तो दिवाकृत् स्वभा
विस्तीर्याथ तमो गतं सुरपथाद्रङ्गेश बोधं भज ॥

**End:**

प्राबोधकस्तोत्रमिदं रङ्गेशस्य विपश्चिता ।
व्यक्तीकृतार्थं वादीन्द्रभीङ्करपुत्रेण पद्यतः ॥

---

(c-1) नागपुरीगुणप्रकाशः.

NĀGAPURĪGUṆAPRAKĀŚAḤ.

Foll. 72a.

In praise of the various forms of God Viṣṇu worshipped in the sacred shrines on the banks of the Cauveri, near Negapatam: apparently by Vēṅkaṭēśa.

Complete.

**Beginning:**

स्थले शोधकवाक्यार्थः श्रियः पत्युः प्रकाशते ।
मणिवाटमहारङ्गे सत्यतादिः परात्मनः ॥
वैकुण्ठनगरे विष्णोर्भाति मुक्तोपसृप्यता ।
अरेर्नरहरे रुक्मनाम्नः पङ्कजचक्षुषः ॥

**End:**

श्रीनागनगरीमध्ये चाकशीत्यविकारिणः ॥
लक्ष्मीरङ्गे नामसाम्याच्छेषशायित्वलक्षणम् ।
भासते रङ्गराजस्य साम्यं सद्धजयान्विते ॥
गजेन्द्रादिभवद्वर्गपरमापत्सहायता ।
मणिकूटे जगन्मूर्तेः प्रकटीक्रियते प्रभोः ॥
अशरण्यशरण्यत्वमथितालवनं हरेः ।
श्रीचम्पकेशवेषस्य विशदीक्रियते भृशम् ॥

* * * *

पृथातनयशरद्धायां हतकंसमदावले ।
रमेशे दृश्यते रम्ये पुंसोऽपि स्त्रीत्वदायिता ॥

---

(d-1) भगवन्मङ्गलाशासनम्.

BHAGAVANMAṄGALĀŚĀSANAM.

Foll. 72a—73a.

Benedictory stanzas addressed to the different forms of Viṣṇu mentioned in the last work: by the same author as of the last.

Complete.

**Beginning:**

मणिवाटमहारङ्गनिलयायाभ्रदेहिने ।
नारायणायामेयाय नन्दादीपाय मङ्गलम् ॥

**End:**

क्षीराब्धितीरवासाय मारोल्लसितमूर्तये ।
तारेशवदनायाहिपुरीशायास्तु मङ्गलम् ॥
अरुणाम्बुजसङ्काशचरणाम्बुजशालिने ।
पुरुषोत्तम लक्ष्मीश गुरुमङ्गलमस्तु ते ॥
वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
पुरुषोत्तमनाथाय पुरुषायास्तु मङ्गलम् ॥

Fol. 74a contains a few lines of Bhūtaśuddhi and foll. 73b—74 contain commentary in Maṇipravāla on some Sanskrit passages.

---

(e-1) यामुनार्यपञ्चविंशतिः.

YĀMUNĀRYAPAÑCAVIṂŚATIḤ.

Foll. 75a—76a.

Twenty-five stanzas in praise of Yāmunācārya, also well-known as Āḷavandār, son of Īśvaramuni and grandson of Nāthamuni: by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

**Complete.**

**Beginning :**

नाथाभिधानयमिनिस्तनयाद्धरण्यां योऽजायतेश्वरमुनेर्दिवसाधिनाथे ।
ऋक्षे कुळीरमधितिष्ठति वैश्वदेवे तं यामुनेयमुनिवर्यमहं भजामि ॥

बाल्ये य एष विदिताखिलशास्त्रवर्गः पात्रावलम्बनमहो विरचय्य गोष्ठ्याम् ।
राज्ञो निरस्तपरवादिगणो महिष्या दत्तस्ववल्लभपणार्पितदेशराज्यः ॥

**End :**

विज्ञापनं यदिदमद्य तु मामकीनमङ्गीकुरुष्व करुणार्णव यामुनार्य ।
अस्मत्कुलेशपरवादिभयङ्करार्य वीक्ष्य प्रसीद मम वृत्तमचिन्तयित्वा ॥
प्रोक्तां सुतेन परवादिभयङ्करस्य श्रीवेङ्कटेशकविना यमुनाळयस्य ।
यः पञ्चविंशतिमिमामनुसन्दधानः कालं क्षिपेत्सखलु धन्यतरो धरित्र्याम् ॥

---

(*f*-1) शठकोपशतकम्.

ŚAṬHAKŌPAŚATAKAM.

Foll. 76*a*—31*b*.

A centum of stanzas in praise of Vakulābharaṇa or Saint Śaṭhakōpa: by Vēṅkaṭēśa, son of Vādibhīkara or Prativādibhayaṅkarārya.

Complete.

**Beginning:**

अस्मत्कुलाधिपतिमद्भुतवैभवाढ्यमाराधयन्तमनिशं परिपूर्णवीथीम् ।
आयान्तमागमशिरोयुगलैकचित्तमाचार्यमाकलितवादिभयं प्रपद्ये ॥

प्रपन्नजनकूटस्थं वकुलाभरणं मुनिम् ।
नौमि दासस्य सिद्ध्यर्थं पद्यमित्यादिनीवितः(!) ॥

वकुलाभरणाचार्य श्राव्यां सज्जनकर्णतः ।
त्वमेव देहि वाचं मे कृपास्ति यदि ते मयि ॥

**End:**

नाथाभिधाय्योपदिशन् प्रबन्धानशेषतः स्वस्य मुनिस्स्ववाचा ।
प्रवर्तितात्मोक्तिचयोऽप्यनेन कुर्यात् स्वसूक्तौ निरतं सदा माम् ॥

संवीक्ष्य रम्यवरदं परमं गुरुं मे त्वत्सूक्तिमेव सततं परिशीलयन्तम् ।
मद्वृत्तचिन्तनमृते स्तुतिवाचमेतामङ्गीकुरुष्व शठकोपमुने दयालो ॥

वादीन्द्रभीकरसुतेन वृषाद्रिनाथनाम्ना कृता स्तुतिरियं शठशात्रवस्य ।
अङ्गीकृतार्थहृदयार्थगणप्रकाशकारिण्यनल्पमतिभिस्त्वनसूयुभिस्स्यात् ॥

Foll. 81*b* and 82*a* contain some stanzas relating to the realisation of Lakṣmī by the author. Foll. 82*a* to 84*a* contain stanzas giving the line of teachers through whom the Śrībhāṣya and the Īḍu (a commentary on the Tiruvāymoḻi) were handed down.

---

(*g*-1) रामसंबोधनस्तोत्रम्.

RĀMASAṂBŌDHANASTŌTRAM.

Foll. 84*a*—87*b*.

A eulogy addressed to Rāma with a view to secure protection. The peculiarity of this work is that all the names and attributes relating to Rāma are introduced in the stanzas only in the vocative case and that the thread of the story of the Rāmāyaṇa is indicated by means of such attributes: by Vēṅkaṭēśa, son of Prativādi-bhayaṅkarārya.

Complete.

**Beginning:**

मत्स्य कूर्म किटे मर्त्यसिंह वामन भार्गव ।
राम प्रलम्बहन् कृष्ण कल्किन् पाहि दशाकृते ॥
राम दाशरथे रक्ष कौसल्यातनयाग्रज ।
भरतस्य च सौमित्र्योः क्रीडापर मनोहर ॥
अधीतवेदवेदाङ्गधनुर्वेद महामते ।
कौशिकार्थिततल्लब्धबलातिबल पाहि माम् ॥

**End:**

पुराय भूयात् साकेतनाम्ने दिव्यर्षिमेयुषे ।
अस्तूत्तराय देशाय कोसलायापि मङ्गलम् ॥

सम्बोधनमिदं स्तोत्रं सूनुना वादिभीकृतः ।
वेङ्कटेशेन रामस्य रचितं जयतात्सदा ॥

---

(*h*-1) रङ्गेशचित्रप्रबन्धः.

RAṄGEŚACITRAPRABANDHAḤ.

Foll. 87*b*—88*b*.

A kind of peculiar composition in praise of God Raṅganātha of Srirangam: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

एकं निदानं समस्तजगतामनभिमतनिवारणाभिमतसम्पादनद्वयसाधनमेकं प्रदीपमविद्यातमोनिरसनेऽपि एकं सुधांशुं सज्जनमनःकुमुदविकासने सकलसुरवन्दितचरणारविन्दद्वयं त्रिणयनशापमोचकं कमलायै हृदयप्रवक्तारमेकं शिखावन्तमाश्रितजनदुरितगहनेऽपि एकं गोत्रभिदं नखकुलिशेन हिरण्यगिरिविदारणे जनतानामनुकूलानां चोक्षिनीपाथोनिनीषावशेन साध्वसाधुकर्मद्वये कारयितारं त्रिविक्रमरूपमाक्रान्तचतुर्दिगन्तं त्रयीशिरसामप्यवाङ्मनसगोचरवैभवम् ।

**End:**

अप्रमेयशक्तिमखिलजगत्स्वामिनमस्मत्स्वामिनं श्रीरङ्गनाथमकिञ्चनशिखामणिरनन्यगतित्वमूर्धाभिषिक्तः शरणमहं प्रपद्ये ॥

चित्रप्रबन्धो रङ्गेशविषयो राजते कृतः ।
वादिभीकरपुत्रेण वेङ्कटेशाभिधाजुषा ॥

---

(*i*-1) श्रीमुष्णनायकस्तोत्रम्.

ŚRĪMUṢṆANĀYAKASTŌTRAM.

Foll. 88*b*—89*a*.

A eulogy on God Viṣṇu worshipped as Bhūvarāha in the sacred shrine at Śrīmuṣṇam (in the South Arcot district).

Complete.

**Beginning :**

श्रितसुमुष्ण भो श्रीवराह ते पदसरोरुहे पल्लवोपमे ।
मदपतोदने मञ्जुभूषणे नमति मे शिरो नाकिसन्नुते ॥
वहति मेदिनी वार्धिमेखलां कुमतिदुर्लभं कोमलाकृतिम् ।
विशदमेघभं विश्रुतं हि यत् श्रुतिशिरस्सु मे शोभते हृदि ॥
तन्नभूभृता कोलमीडितं मुरभिदं भजे मुष्णनायकम् ।

**End :**

दमितदण्डकं दक्षिणामुखं विधृतमण्डनं विश्वमोहनम् ।
कमलवासिनीकम्रवक्षसं पुरुषपुङ्गवं पोत्रिणं भजे ॥

Fol. 89*a* contains also a few stanzas of benediction addressed to Kalijit or Tirumaṅgaiyāḻvār.

---

(*p*-1) नागपुरीविजयस्तोत्रम्.
NĀGAPURĪVIJAYASTŌTRAM.

Fol. 89.

In praise of the sacred Viṣṇu shrine in Negapatam, which has been glorified by Kalijit or Tirumaṅgaiyāḻvār: apparently by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning :**

पनसचम्पक . . . . . (मधुक)राहितशक्रतिमाधवी ।
कदलिकावनपूगपरिष्कृता विजयते भुवि नागपुरी शुभा ॥
त्रिविधवह्निचतुःश्रुतिलम्पटैर्विहितपञ्च . . . . . भिः ।
रचितवासवती धरणीसुरैः विजयते भुवि नागपुरी शुभा ॥

**End :**

कदलिकापरिपूर्णरसादनीं कृतवता सजता कपिना शिशुम् ।
कृतनिवस्तिरसालमहीरुहे विजयते . . . . . . . . ॥

सकलभौमजनस्तुतनागपुर्यधिप . . . . . . . . . षा ।
कलिजिता परिनन्दितवैभवा विजयते भुवि नागपुरी सदा ॥

A few stanzas of miscellaneous nature are added.

Foll. 89*b*—90*a* contain a stanza giving the summary of Saṅkalpasūryōdaya.

---

(*k*-1) मङ्गलाचलेशनृसिंहप्रपत्तिः.
MAṄGALĀCALĒŚANṚSIṀHAPRAPATTIḤ.

Fol. 90*a*.

Stanzas of self-surrender addressed to God Nṛsiṁha worshipped in the sacred shrine at Maṅgalagiri; by the same author as of the last.

Complete.

**Beginning:**

श्रीमन्नृसिंह कनकाह्वय देववैरिवक्षःक्षतिप्रहरणायितपाणिजात ।
श्रीमङ्गलाचलपते शतपत्रतुल्यौ तौ तावकीनचरणौ शरणं प्रपद्ये ॥
कल्याङ्कुशातपनिवारणवज्रकुम्भमत्स्यध्वजाम्बुजमुखैर्महनीयचिह्नैः ।
संभूषितावतुलमङ्गलशैलनाथ श्रीमन्नृसिंह चरणौ शरणं प्रपद्ये ॥

**End:**

उग्रज्वलन् सकलभीषण भद्र विष्णो वीराग्रगण्य विविधानन मृत्युमृत्यो ।
वादीन्द्रभीतिकरदेशिकदर्शितौ ते श्रीमन् नृसिंह चरणौ शरणं प्रपद्ये ॥

---

(*l*-1) परकालशतकम्.
PARAKĀLAŚATAKAM.

Foll. 90*a*—91*a*.

This is a summary in one hundred and eight stanzas of the Tamil work Periyatirumoḻi of Tirumaṅgaiyāḻvār, each stanza containing the subject-matter of one of the one hundred and eight sub-sections into which the Tamil work is divided. The author of the Tamil work is incidentally praised, and the first letters of the one hundred and eight Sanskrit stanzas are made to coincide with the first letters of the one hundred and eight sub-sections. By Vēṅkatēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

कलिजिद्गुरुदिव्योक्तिदशकाद्यक्षरादिभैः ।
एष संस्तूयते पद्यैस्तत्तात्पर्यप्रकाशकैः ॥
बाराहकरुणालब्धसार्थमूलमनुः कविः ।
तन्नाकलशघोणे द्वे प्राह स्म प्रेमगौरवात् ॥
वालिमृत्यादिचरितं . . . लिलक्ष्मीपतिस्थितम् ।
हिमाचलस्थलं याहि चेत इत्यब्रवीत् समुत् ॥

**End:**

वेङ्कटेशेन वादीन्द्रभीकृद्देशिकसूनुना ।
प्रोक्तं कलिघ्नशतकं प्रतिगृह्णन्तु वत्सलाः ॥
परकालस्य शतकं पठन्ति भुवि ये नराः ।
तेषां तत्कृपया भोगमोक्षौ करतलस्थितौ ॥
परकालमहासूक्तिनिष्णाताः प्रेमशालिनः ।
सङ्ग्राहिकां तदर्थानामङ्गीकुर्वन्त्विमां कृतिम् ॥

Foll. 94a and 94b contain a (Yamaka) stanza from the Pādukāsahasra as well as its commentary.

---

(m-1) कृष्णवत्सरावलिस्तोत्रम्.

KṚṢṆAVATSARĀVALISTŌTRAM.

Foll. 94b–97a.

A eulogy on Lord Kṛṣṇa in sixty stanzas, each of which contains respectively the names of the successive years of the sixty year Indian cycle: by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

अस्मद्गुरूंस्तदाचार्यानपि सर्वगुरूनहम् ।
नमामि शिरसा वाचा स्तौमि ध्यायामि चेतसा ॥

अब्दवाचिपदोपेतपद्यजालेन माधवम् ।
स्तोष्यामि देवकीसूनुमस्मदन्वयदैवतम् ॥
विश्वस्य प्रभवं वेदमौलयो यं प्रचक्षते ।
स भाति यदुवंशस्य परिष्कारो रमापतिः ॥

**End:**

संपूर्य वीथिमायान्तं गवां पश्चात्सवेणुकम् ।
गोपजैर्बालगोपालं नमाम्यक्षयसम्पदम् ॥
वादिभीकरपुत्रेण वेङ्कटेशेन धीमता ।
कृता स्तुतिः कवीन्द्रेण कृष्णेन विषयिण्यसौ ॥
वत्सरावली मत्सरातिकीर्तिविश्वमोहिनी शश्वदुज्वला ।
दृश्यतामियं वश्यमानसैर्भद्रदा भवेद्विद्रुतामतिः ॥

Foll. 97 and 98 contain Maṇipravāla passages relating to a commentary on a Tamil stanza.

---

(*n*-1) घटनृत्तेशमङ्गलाशासनम्.
GHAṬANṚTTĒŚAMAṄGALĀŚĀSANAM.

Foll. 99*a* and 99*b*.

Benedictory stanzas addressed to God Viṣṇu worshipped in the form of Kṛṣṇa dancing with a pot of nectar in his hand in the shrine of Arimēyaviṇṇagaram at Tirunāṅgūr in the Tanjore district: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya. In the end reference is made to one Varada, *i.e.*, Varadācārya, who caused the construction of certain portions of the temple in that place.

Complete

**Beginning:**

हरिवासान्तरिक्षाह्वनगरीमधितिष्ठते ।
कमलावनिनाथाय घटनृत्ताय मङ्गलम् ॥
नरकारातये हेतिपतिवाहाय नाकिनाम् ।
अमृतं ददते भूयाद्‌घटनाथाय मङ्गलम् ॥

**End:**

वसन्तो वैष्णवास्तुभ्यं मङ्गलानि प्रयुञ्जताम् ॥

विमानगोपुरमुखैः वरदारचितैः शुभैः ।

कैङ्कर्यैः प्रीतचित्ताय घटनृत्ताय मङ्गलम् ॥

वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।

घटनर्तनलक्ष्मीश मङ्गलानि भवन्तु ते ॥

---

(o-1) ஞானசாரஸங்க்ரஹம்.
JÑĀNASĀRASAṄGRAHAM.

Foll. 100*a*—147*b*.
See the Tamil Part of this Catalogue
Complete.

---

(p-1) कूरेशस्तोत्रम्.
KŪRĒŚASTŌTRAM.

Foll. 147*b*—148*a*.

A eulogy on Kūrēśa or Kūrattāḻvār also known as Śrīvatsacihnamiśra, a chief disciple and collaborator of Rāmānuja: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

श्रीमान् यतीन्द्रपदपङ्कजसंश्रितानां

कूरान्ववायजलधेः प्रथमस्सितांशुः ।

श्रीवत्सचिह्न इति भूमितले विभाना(ता)त्

श्रीमत्पराशर इति प्रथितश्च सूरि(नुः) ॥

श्रीवत्सचिह्नगुरुपुङ्गव मादृशानां

रक्षाप्रवीण करुणार्णव लोकपूज्य ।

वादीन्द्रमत्तगजपञ्चमुखागमान्त-

युग्मार्थवित्तम शुभं मम कुर्वशेषम् ॥

**End:**

बोधायनेन रचितां सकृदेव वृत्तिमालेख्य चेतसि दधार हि यस्तदर्थान् ।
श्रीवत्सलक्षणगुरौ मम देशिकेऽस्मिन भारं समर्प्य सकलन्त्वमरोऽभयोऽस्मि॥
वादीन्द्रभीकरसुतेन कृतां वृषाद्रिनाथेन ये कृतिमिमां धरणौ पठन्ति ।
श्रीवत्सचिह्नविषयान्त इमे तदीयकारुण्यतो मतिसुखाढ्यतरा भवेयुः ॥

---

(१-1) शार्ङ्गपाणिभुजङ्गप्रयातम्.

ŚĀRṄGAPĀṆIBHUJAṄGAPRAYĀTAM.

Fol. 148.

A eulogy in stanzas of the Bhujaṅgaprayāta metre on God Śārṅgapāṇi, a form of Viṣṇu, worshipped in the sacred shrine at Kumbakonam; by Vēṅkaṭēśa.

Complete.

**Beginning:**

भुजङ्गप्रयातस्तुतिं कुम्भघोणक्षितीशस्य रम्यां यथाशक्ति कुर्वे ।
इमामार्यमिश्रा विलोक्य प्रहृष्टा भवन्तु प्रसन्नस्तदा शार्ङ्गपाणिः ॥
भुजङ्गाधिपस्य स्फटामण्डलस्थज्वलद्रत्नकान्तिप्रलिप्ते सुभोगे ।
शयानं रमाभूलसत्पार्श्वयुग्मं भजे शार्ङ्गपाणिं मनोहारिरूपम् ॥

**End:**

भुजङ्गप्रयातस्तुतिं वेङ्कटेशप्रणीतां लिखंश्चापठंश्चापि शृण्वन् ।
स शेषे शयाने पुरे कुम्भघोणे हरौ भक्तियुक्तो भवेदेव शीघ्रम् ॥

---

(२-1) शार्ङ्गपाणिस्तोत्रम्.

ŚĀRṄGAPĀṆISTŌTRAM.

Fol. 149a.

Similar to the above, but the stanzas here are in different metres.

Complete.

**Beginning:**

वारिदप्रकाशगौरिभतृपालमूरिसत्-
गुणौघवैरिपक्षकाल . . . . . . .
नीलरत्नशोभसालभित्सुत्राणहेल-
मर्त्यसिंहकोलकृष्णारामम् ।
नखराग्रविनिकृत्तकनकप्रतीक

**End:**

वामदम्विहारमूमतिस्वसेविहेम-
कुम्भघोणधामनि स्थिराश्रा ।
तद्वत्तमृगमेय मयि देवदेव ॥

---

(s-1) प्रमेयशेखरकारिका.

PRAMĒYAŚEKHARAKĀRIKA.

Fol. 149.

A work giving in the form of verses what is stated in the Maṇipravāla work, Pramēyaśēkhara, of Lōkācārya described under No. 931 of the D.C. Tamil MSS., Vol. II: by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

निर्हेतुककटाक्षेण सुकृतं स्यादयत्नतः ।
अद्वेषस्तु ततस्सिध्येत्तन्मूलकमनुत्तमम् ॥
आभिमुख्यं तदीयेषु ततस्स्याद्भगवत्यपि ।
ततस्त्याज्यसमादेयविभागज्ञानकौतुकम् ॥

**End:**

सर्वत्र काले सर्वस्मिन्नवस्थास्वखिलास्वपि ।
सर्वप्रकारकैङ्कर्यं सिध्येत् स्वामिनियोगतः ॥
यः प्रमेयाणि संगृह्य ज्ञातव्यान्यखिलान्यपि ।
प्राकाशयत्तदार्याणां वन्दे लोकार्यमुत्तमम् ॥
प्रमेयशेखरमिदं लोकाचार्यविनिर्मितम् ।
पद्याकारेण रचितं वादिभीकरसूनुना ॥

(*i*-1) हस्तिगिरीशस्तोत्रम्, सव्याख्यानम्.

HASTIGIRIŚASTŌTRAM WITH COMMENTARY.

Foll. 149*b*—152*b*.

A eulogy on Viṣṇu worshipped under the name of Varadarāja in the sacred shrine of Hastigiri in Conjeeveram. The stanzas of the work illustrate the figure of speech known as the Ardha-Yamaka, *i.e.*, portion of a half of each stanza is similar in form to the other half but with a different meaning.

Incomplete.

**Beginning:**

जीयात् द्विरदगिरीशो मारमनोज्ञो महीसुरा यद्वाः ।
अभ्यस्यन्ति यतोऽस्तं मारमनोज्ञो मही सुरा यद्वाः ॥

यद्वाः भूसुराः यद्वा अभ्यस्यन्ति यतः अमारम् अरसहितम् । अनः अस्तं मारमनोज्ञः ज्ञः महीसुराः द्विरदगिरीशः जीयात ।

यस्य पयोधेः पार्श्वे तनयां कल्याणगुणसमानाङ्गीन् ।
भूम्यासीनामाहेतनयां कल्याणगुणसमानाङ्गीम् ॥

**End:**

नागः नागगिरिः भुजङ्गगिरिर्हस्तिगिरिर्वा नागशब्दस्योभयार्थकत्वात पदद्वयेनाप्यस्य श्लोकस्य स्थलत्रयविषयत्वमुक्तं विकल्पेन उरः उकारवाच्यां राति गृह्णातीत्युरः लक्ष्मीधर इत्यर्थः उरगे उर इत्यनेन तया सहासीनमनन्त-भोगिनीत्येतदनुस्मारितम्.

उदीरितकलाकस्यगोवाच्यकृतिशालिनः ।
गोहेतुगोमद्रोलोकी स्यादोकश्शयगं ततः ॥

भगवदभिहितगीताशिरोवर्तमानचरमश्लोकप्रतिपाद्यप्रपत्त्या विराजमानस्य.

* * * *

अत्यक्तः कानलदीर्घं तत्स्थानं विष्णोर्महात्मन इत्युक्तत्वात् एवमुचितं तत्र ओकः तस्य भगवतः स्थानम्। पञ्चम्यास्तसिल्। सार्वविभक्तिकत्वात्तस्य। शालिनश्शयगमित्यन्वयः ।

(a-1) भक्तनाथमङ्गलाशासनम्.

BHAKTANĀTHAMAṄGALĀŚĀSANAM.

Foll. 152b—153b.

In praise of God Dēhalīśa, a form of Viṣṇu, worshipped in the sacred shrine at Tirukkōyilūr, a place situated on the banks of the southern Pennar in the South Arcot district. This is included in the list of works attributed to Vēṅkaṭēśa. The construction of the huge unfinished outer gate-way of the temple in the place is herein attributed to Śrīśailapūrṇa.

Complete.

**Beginning:**

श्रीमद्भिस्सरसीभूतमहदाह्वययोगिभिः ।
ज्ञानप्रदीपदृष्टाय भक्तनाथाय मङ्गलम् ॥
परंकालमुनीशानादिव्योक्त्यासक्तचेतसे ।
भवताल्लोकनाथाय भक्तनाथाय मङ्गलम् ॥
पेण्णानदीलसत्पार्श्वश्रीगोपनगरौकसे ।
भक्तसंमर्दसंशोभिदेहलीशाय मङ्गलम् ॥

**End:**

यतीशयोगिना श्रीमच्छैलपूर्णाह्वयोगिना ।
अपि लक्ष्मणयोगीशा सेवितायास्तु मङ्गलम् ॥
श्रीशैलपूर्णयोगीन्द्रकृतकैङ्कर्यतुष्टये ।
श्रीगोपपुरवासाय भक्तनाथाय मङ्गलम् ॥
वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
दिव्यं भक्तेश्वरैश्वर्यं वर्धतामभिवर्धताम् ॥
श्रीशैलपूर्णयोगीन्द्रारब्धं पृथुलगोपुरम् ।
भक्तेश तव सङ्कल्पात् क्षिप्रं निर्वर्तय प्रभो ॥

Foll. 153b and 154 contain a few stanzas relating to Pañcasaṁskāra.

(ख-1) भक्तामृतरामचरितामृतमैत्री.

BHAKTĀMṚTARĀMACARITĀMṚTAMAITRĪ.

Foll. 155*a*—159*a*.

This work attempts to show that the teachings contained in the Aṣṭākṣaramantra, in the Dvayamantra and in the Tamil Tiruvāymoḻi are also found in the Rāmāyaṇa. By Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

जायमानं हि पुरुषमित्यादिप्रकारेण भगवत्कटाक्षविशेषेण संपन्नसत्त्वोद्रेकस्य मोक्षार्थैचिन्तकस्य . . . . . . . . . . . . .

ऋचो यजूंषीतिप्रकारेण गर्भितसकलवेदार्थः श्रीमानष्टाक्षरो मन्त्रराडेव निरन्तरमनुसन्धेयः ।

**End:**

एवं मन्त्रराजमन्त्ररत्नद्राविडब्रह्मसंहितार्थप्रकाशकत्वादिदं सद्भिस्सन्ततमादरणीयमिति सर्वं समञ्जसम् ॥

मैत्रीमिमां मनुमहीश्वरमन्त्ररत्न-
कार्यात्मजोक्तिनिवहस्य विलोकयन्तु ।
भूश्रोत्रजन्ममुनिसूक्तिचयस्य चोक्तां
वादीन्द्रभीकरसुतेन महानुभावाः ॥

(ख-1) दुष्टशिक्षा.

DUṢṬAŚIKṢĀ.

Foll. 159*a*—160*a*.

A eulogy on God Śārṅgapāṇi, a form of Viṣṇu, worshipped in the sacred shrine at Kumbakonam. He is so called because He has the Sārṅga (the bow of Viṣṇu) in His hand for punishing the wicked and those who cause hinderance to the performance of His worship and festivals: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

देव्या श्रिया मृदुलताधिकया समेतं
वात्सल्यशीलसुलभत्वपतित्वधर्मिभिः ।
शक्त्यापि पूर्णमभिजातपदारविन्दं
श्रीशार्ङ्गपाणिमगतिः शरणं प्रपद्ये ॥
त्राण(णाय) साधुनिवहस्य च दुष्टहान्यै
धर्मस्य च प्रतियुगं परिपालनाय ।
शार्ङ्गिन् भवाम्यहमिति ब्रुदितं यथार्थं
कुर्वन् भुजङ्गशयने वितनोषि निद्राम् ॥

**End:**

एवं विरोधिनि हते भवतोऽस्तु पूजा
प्राकारगोपुरमुखं सकलं समृद्धम् ।
त्वद्दिव्यदेशवसतिं च महीसुराणां
सङ्घो मुदं भजतु सन्ततमिन्दिरेश ॥
वेङ्कटेशेन वादीन्द्रभीकराचार्यसूनुना ।
दुष्टशिक्षां कृतां वीक्ष्य प्रीतास्स्युस्सज्जना भुवि ॥

---

(૪-1) दुष्टशिक्षा, सव्याख्या.

DUṢṬAŚIKṢĀ WITH COMMENTARY.

Foll. 160*a*—168*b*.

Same work as the above, but with the addition of a commentary by the same author as of the text. It is stated herein that the author Vēṅkaṭēśa, the son of Prativādibhayaṅkara, was born and resided in Kumbakonam.

Complete.

**Beginning:**

प्रणम्य पुण्डरीकाक्षं भक्तिनम्रेण मौलिना ।
व्याख्याति दुष्टशिक्षाख्यं प्रबन्धं वेङ्कटेश्वरः ॥

इह खलु सात्त्विकजनसमावृते कलशघोणनगरे जातः तस्मिन्नेव वसन् वेङ्कटेशाह्वयो वादिभीकराचार्यदासः तत्स्वामिनि शार्ङ्गपाणावभिमान-

विशेषेण तत्पूजोत्सवादिप्रत्यूहकारिणः पाषण्डिनः घोरान् समीक्ष्य नितान्तम सहमानः क्षिपामि न क्षमामीत्युक्तवन्तं भगवन्तमेव समाश्रित्य दुष्टानामेषां शिक्षां विधेहीति प्रार्थयते अनेन प्रबन्धेन। अत एव दुष्टशिक्षेत्येतस्य नाम। दुष्टशिक्षासाधनत्वात्तच्छब्देनोपचर्यते। तत्र प्रथमश्लोकेन वक्ष्यमाण-विरोधिनिरसनप्रार्थनासाफल्यार्थं तत्र तत्र भगवदुक्तिप्रत्युक्तिसहनार्थं प्रारिप्सितस्य प्रबन्धस्य निरन्तरायसमापनार्थं च सकलफलप्रदं भगवन्तं शृणुते—देव्येत्यादिना। अत्र शरणागतिमन्त्रार्थानुसन्धानक्रमेण शरण वरणं विधीयते। अस्मिन् क्रियमाणायाः प्रपत्तेरमोक्षार्थत्वाच्चोत्तरवाक्यार्थानु-सन्धानम्।

**End:**

सह्य इत्यनेन श्रीकुम्भघोणस्य श्रीवैष्णवभूयिष्ठत्वमुक्तम्। सन्तत-मित्यनेनेतः परमप्येतादृशो विरोधी मा भूदिति तात्पर्यम्। देव्या श्रियेत्युप-क्रमादिन्दिरेशेत्युपसंहृतमिति सर्वं रमणीयम्॥

व्याख्यानं दुष्टशिक्षाया वादिभीतिकरात्मजः।
व्यतनोद्दुष्टशिक्षार्थिजनसन्तुष्टये भृशम्॥

---

(y-1) ब्रह्मसूत्राणि.

BRAHMASŪTRĀṆI.

Foll. 169a—171a.

Same work as that described under No. 4649 of the D.C.S. MSS., Vol. IX.

Complete.

---

(z-1) यतीश्वरविषयश्लोकः, सव्याख्यः.

YATĪŚVARAVIṢAYAŚLOKAḤ WITH COMMENTARY.

Foll. 171a—174b.

A stanza with commentary in praise of Yatīśvara or Rāmānuja, who was born at Śriperumbūdūr in the Chingleput district.

Complete.

**Beginning:**

महितामरसार्थेशहरिपादद्वयप्रदम् ।
गुरुभूतपुरोत्पत्तियुजमीडे यतीश्वरम् ॥

मकारवाच्यानां जीवानां हितमुपायभूतं पदद्वयमिति वा एवकोपायत्वेनो-पेयत्वेन तत्प्रद इत्यर्थः । महि उत्सवयुक्तम् । मह उद्धव उत्सव इति निघण्डुः तामरससदृशम् मध्यमपदलोपी समासः । अर्थरूपं प्रयोजनरूपमिति वा । महितं पूजितं आमरं अमरसम्बन्धि । सदा पश्यन्तीति प्रकारेण तदनुभाव्य-त्वात्.

**End:**

वर्णाश्रमभेदे पुण्यानुष्ठानस्य व्यवस्थितत्वात् यथा स्ववर्णस्वाश्रमो-चितपुण्यानुष्ठानं भगवत्प्रियं तथा स्वानुचितपुण्याननुष्ठानमपि तत्प्रियमेव । ब्राह्मणादिवर्णत्रयोचितं यागादिकमकुर्वन्नपि वर्णत्रयशुश्रूषाकरः शूद्रः भगवत्प्रिय एव । अतएव सततं त्रिदण्डहस्तं वेत्रसारस्त्रिदण्डं दण्डैस्त्रि-भिर्मण्डितेति प्रशंसितम् । एवंभूतं यतीश्वरमीड इत्यन्वयः ॥

Foll. 174b—176a contain certain stanzas of Sarvatōbhadra-bandha relating to the eulogy of Rāma. These are apparently attributed to Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

---

(a-2) दशावतारस्तोत्रम्.

DAŚĀVATĀRASTŌTRAM.

Foll. 176b—182b.

A eulogy on the ten incarnations of God Viṣṇu: by Vēṅka-ṭēśa, son of Prativādibhayaṅkarārya.

Complete

**Beginning:**

यो नाम पूर्वमवतीर्य ररक्ष विश्वं फेनावगाढचलदूर्मिभरेऽम्बुराशौ ।
केनाहमस्मि परवानरविन्दनेत्रं मीनाकृतिं मधुनिषूदनमन्तरेण ॥

लोकं विभर्ति सकलं कमठो भवन् यो नाकं परेण परमे गगने विदीप्तः ।
साकं रमादिमहिषीगतवन्यनित्यैः शोकं स मे हरतु संसृतिजं मुकुन्दः ॥

**End** :

वाहाभिरूढ उररीकृतखड्गपाणिः मोहाविलां कलिविजृम्भितकल्मषाख्याम् ।
यो हा हनिष्यति हि विष्णुयशस्तनूजो नीहारभानुवदनोऽवतु नरस कल्की ॥
श्रीवादिभीतिकरनामगुरोः कृदष्टिनीवारजालशमनस्य तनूभवेन ।
सेवाकृतास्य रचितेयमहो स्तुतिर्भूदेवाभिनन्दनकरेण वृषाचलेशा ॥

---

(l-2) वरदराजस्तोत्रम्.

VARADARÂJASTÔTRAM.

Fol. 182b.

Similar to the work described under No. (l-1) *ante*.

Complete.

**Beginning** :

वरदं नमदरवन्तं कंसस्येभं विजित्य नमदरवन्तम् ।
भान्तं वसनापीतं सृष्ट्वा जगदत्र हृन्नवसनापीतम् ॥

**End** :

मुनिमननसारसमेतं करिगिरिनाथं मनोज्ञसारसमेतम् ।
संगुणापादनतानां वरदमुदारं प्रणौमि पादनतानाम् ॥

---

(c-2) सम्पत्कुमारमङ्गलाशासनम्.

SAMPATKUMÂRAMAṄGALÂŚÂSANAM.

Fol. 183.

In praise of Sampatkumâra or Tirunârâyaṇa, a form of Viṣṇu, worshipped in the sacred shrine at Melkota or Yâdavâcala: apparently by Vêṅkaṭêśa, son of Vâdibhîtikarârya.

Complete.

**Beginning** :

श्रीमते जगती . . . . . . . . लये ।
यादवाचलनाथाय सम्पत्पुत्राय मङ्गलम् ॥

उपास्याय शरण्याय कारणन्त्वितिवार्थतः ।
यो ब्रह्माणं च वेद्याय सम्पत्पुत्राय मङ्गलम् ॥

**End :**

वादिभी . . . . . . . . . . रोरुहः ।
राज . . . . . सततं सम्पत्पुत्राय मङ्गलम् ॥
भक्त्यम्बुपूर्णं सम्पत्कुमारचरणौ शरणं प्रपद्ये ॥

---

(d-2) பெரியதிருமொழி, உரையுடன்.

PERIYATIRUMOLI WITH COMMENTARY.

Foll. 184a—2036.

See the Tamil part of the Triennial Catalogue.

---

R. No. **1454.**

Paper. 10⅜ × 8½ inches. Foll. 202. Lines, 28 in a page. Telugu. Good.

Purchased in 1914-15 from M.R.Ry. A. Tiruvenkaṭācariyar of Dāmal in the Chingleput district.

रहस्यत्रयमीमांसाभाष्यम्.

RAHASYATRAYAMĪMĀṂSABHĀṢYAM.

Same work as that described under Nos. 5340 and 5341 of the D.C.S. MSS., Vol. XI. By Lakṣmaṇācarya *alias* Rāmānujadāsa.

Breaks off in the third Adhikaraṇa of the third Pāda in the first Adhyāya.

**End :**

अतस्ताहश्येयोम्यताविरोधिस्वशेषनिवृत्तिरवश्यं वक्तव्येति भावः । तस्मात् ஒரு ஜீவனுக்கு ஒரு ஜீவன் தஞ்சம(ம)ல்லன் इत्येवमादिरूपेण मन्त्रविन्यास अनाकूत इति स्थितम् ।

**Colophon :**

इति श्रीकृष्णपाद(सूनु)लोकगुरुविरचितरहस्यत्रयमीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयपादे नमःशब्दार्थसमर्थनं नाम द्वितीयाधिकरणं संपूर्णम् ।

இத்தால் விரோதிகளை கழிக்கிறதிति । ननु भगवन्मुखोल्लासः परमपुरुषार्थः

* * * *

सुषुप्तिप्रलययोरतिप्रसङ्गोऽस्ति नवेति तथान्यशेषत्वादिना विरोधित्वे तन्निवृत्तीनां हेतुत्वे चोपबृंहणमस्ति नवेति च तत्र पूर्वपक्षः ।

---

R. No. 1455.

Paper. 10¼ × 7¾ inches. Foll. 89. Lines, 22 in a page. Telugu. Good.

Purchased in 1914–15 from M.R.Ry. A. Tiruvenkaṭācāryar of Dāmal, Chingleput district.

चरमश्लोकटिप्पणीविवरणम्.

CARAMAŚLŌKAṬIPPAṆĪVIVARAṆAM.

A commentary on Lōkācārya's explanation (in the Mumukṣuppaḍi) of the Caramaślōka, which forms the 66th stanza of the eighteenth chapter of the Bhagavadgītā; by a disciple of Śuddhasattvācārya of Kauśikagōtra, who mentions with respect Varavaramuni and Vēdāntadēśika.

Incomplete.

**Beginning:**

कौशिकश्रीशुद्धसत्त्वदेशिकानुग्रहादहम् ।
विवृणोमि सतां प्रीत्यै चरमश्लोकटिप्पणीम् ॥

स्वीयश्लोकवरव्याख्यास्वान्ताविष्कारबुद्धये ।
सौम्यजामातृसूरिर्मे सन्निधत्तां सदा हृदि ॥

अस्मद्गुरुमनोजुष्टघण्टाशेषावतारयोः ।
आस्योत्थौ नादनिश्वासौ निघ्नतां स्वविघातकान् ॥

श्रीमल्लोकगुरोर्व्याख्यां चरमश्लोकगोचराम् ।
अन्तिमां साधयत्वादावाह क्रमनियामकम् ॥

[illegible] इत्यादि । इदத்துக்கு [illegible] செய்தவர்களாம் [illegible] செய்கிறார் इति ।

क्रमरूपनिबाम्यस्य प्रतिज्ञा க்ருதோபாஸ்யமான ஸாதோபாஸ்ய தீயிருக்கின்ற इति.

**End:**

शोकाविष्टमर्जुनमुद्दिश्य तस्य शोक[।]निवृत्त्यर्थमित एतस्मादतिशयितं नास्तीति प्रतिपत्त्यर्हस्य चरमोपायस्यानुगृह्य(ग्रहा)त् चरमश्लोक इत्यस्य नाम भूतं भवति ।

கீழ் சில உபாயவிசேஷங்களை உபதேசிக்க அவை உபாயங்கள் என்றும் ஸ்வரூபவிரோதிகள் என்றும் நினைத்து சோகாவிஷ்டனான அர்ஜுனனைக் குறித்து அவனுடைய சோகநிவ்ருத்யர்த்தமாக இனி இதுக்கு அவ்வருகு இல்லை என்னும்படியான சரமோபாயத்தை உபதேசிக்கையாலே சரமச்லோகமென்று இதுக்குப்பேர் ஆயிருக்கிறது.

---

R. No. 1456.

Palm-leaf. 7½ × 1¼ inches. Foll. 52. Lines, 7 in a page. Grantha. Injured.

Purchased in 1914–15 from Kadir Baig Sahib of Triplicane.

(a) भैरववडवानलमालामन्त्रः.

BHAIRAVABADABĀNALAMĀLĀMANTRAḤ.

Foll. 1a—3b.

Similar to the work described under No. 6850 of the D.C.S. MSS., Vol. XIII.

Complete.

**Beginning:**

अस्य श्रीपरमपुरुषसंज्ञाय वेदान्तवेद्यपरब्रह्मस्वरूपो दुर्वासमहर्षिः, त्रिष्टुप् छन्दः, भैरववडवानलमहाकालपरमेश्वरो देवता । सर्वसंपदां सिद्ध्यर्थे जपे विनियोगः.

ध्यानम्—

वेधोवासववासुदेववरुणप्रद्युम्नवैवस्वत-
प्रायोद्दामसुरासुरेश्वरशिरस्सङ्घातसम्पादिताम् ।

प्रालम्बस्रजमुद्वहन् वत महाशूलायुधो धूर्जटिः
विश्वग्रासविलोकनो विजयते देवो महाभैरवः ॥

मूलम्—ओं नमः कालभैरवाय महादेवाय.

**End:**

भैरववडबानलाय आं ह्रीं क्रों श्रीं ह्रीं ह्रीं क्षां क्षीं क्षं क्षैं क्षौं क्षः क्षेत्रपालाय नमः.

---

(b) प्रत्यङ्गिरासूक्तम्.

PRATYAṄGIRĀSŪKTAM.

Foll. 4a—9b.

Same work as that described under No. 6363 of the D.C.S. MSS., Vol. XIII, but without Ṛṣichandōdavatā and Śāntipāṭha.

Complete.

---

(c) शरभेशाष्टकम्.

ŚARABHEŚĀṢṬAKAM.

Foll. 10a—14b.

Similar to the work described under No. 7321 of the D.C.S. MSS., Vol. XIV.

Incomplete.

**Beginning:**

श्रीशिवौ(व उ)वाच—

शृणु देवि महागुह्यं परमं पुण्यवर्धनम् ।
शरभेशाष्टकामन्त्रं वक्ष्यामि त(व)तत्त्वतः ॥

शरभेश्वरमन्त्रस्य कालाग्निरुद्र ऋषिः, जगती छन्दः, श्रीभगवान् शरभेश्वरो देवता । खं बीजम्, स्वाहा शक्तिः, इष्टार्थे विनियोगः ।

ध्यानभेदं विशेषेण वक्ष्यामि(म्य)हमतश्शिवे ।
ज्वलनकुटिलकेशं सूर्यचन्द्राग्निनेत्रं
निशिततरनखाग्रोद्धूतहेमारदेहम् ।
शरभमयमुनीन्द्रस्सेव्यमानं सिताङ्गं
प्रणतभवविनाशं भावयेत् पक्षिराजम् ॥

**End:**

इति स्तुतो महादेवः प्रसन्नो भक्तवत्सलः ।
सुरानाह्लादयामास वरदानैरभीप्सितैः ॥
प्रसन्नोऽस्मि स्तवेनाहमनेन विबुधेश्वराः ।
मयि रुद्रो महादेवि भज त्वं भक्तिमूर्जिताम् ॥
ममशि . . . . . . . . . . . . . :

---

(*d*) सुब्रह्मण्यमन्त्रयन्त्रविधिः.

SUBRAHMAṆYAMANTRAYANTRAVIDHIḤ.

Foll. 15*a*—52*b*.

On details connected with the drawing of the diagram relating to the Subrahmaṇyamantra.

Wants the beginning and the end.

**Beginning:**

पटाभित्त्यालिखेद्धातुप्रस्तारक्रम मु(उ)च्यते ।
यन्त्रालयसभास्थाने अन्तर्भित्ति दृढीकृतम् ॥
भित्तीषु सौधलेप्यं च गुलोदकसमन्वितम् ।
पश्चाच्छर्करमालेप्य कपित्थसारसंयुतम् ॥
कार्पासपटसंयुक्तं शक्तचिक्कणलेपनम् ।

. . . .

शिवपूजासमायुक्तं शिवमन्त्रविचारतः ।
गुहार्चनसमायुक्तं गुहमन्त्रविचारतः ॥
गुहतन्त्रं च मतिमान् कथाणा तत्र मन्त्रकम् ।
प्राक्पश्चात्तविधानं च असाधारणपण्डितः ॥

**End:**

वणभवशराय स्वैं स्वैं नमः । णं ऐं . . . . . . . . . . .
णं ळं . . . . ह्रीं ण भवशराय नमः

---

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi
CANCELLED D.L.C.

২৭।।২।৭৫

